III. 360 D. पञ्चरक्षा $11\frac{1}{3} \times 2$ inches. Folia 136, divided into 3 parts by two holes. Lines 6 on a page. Extent in ślokas 2,500. Newári Appearance, very old. Date N.S. 194 = 1371 A.D. Prose. Incorrect.

3

DR.RUPAK NATH(DR.RUPAK NATH)

Asiatic Society, Calcutta
Acc. No. B3930 Date 3.6.87

This is a well-known work, described several times. The present MS. contains the usual Budhist Formula of faith at the end followed by the following :—

देयधर्म्मोऽयं प्रवरमहायानयायिनः परमोपासकः श्रीललितापुरे महानगरवरे श्रीकारण्डविहारलिविग्रहाधिवासितः परमसौगतदानपतिनाथभारोकस्य यदत्र पुण्यं तद्भवतु आचार्य्योपाध्यायमातापितृपुरङ्गमं कृत्वा सकलसत्त्वराशेरनुत्तरफलप्राप्तुमिति । श्रेयोऽस्तु सं ४९४ चैत्रशुक्लचतुर्द्दश्यां तिथौ उत्तरफाल्गुनीपरहस्तनक्षत्रे ध्रुवयोगे सोम-वासरे । राजाधिराजपरमेश्वरपरमभट्टारकश्रीजयार्ज्जुनदेवविजयराज्ये वज्राचार्य्य श्रीतुमश्रीनामनेन स्वहस्तेन लिखितमिदं यद्धर्म्मम् । यथा कथञ्चित् लिखितम् मयैतत् बालेन शास्त्रंधिषणः क्षमध्वम् । दशाङ्गुलिमेतत् अशुद्धमेतत् । संशोधनीयं गुणिभिः समस्तैः ।

There is a palmleaf MS. of the same work dated N.S. 684 (1564 A.D.) copied at Kátmundu.

III 360 E. षट्क्रम । 12 × 2 inches. Folia 37, pierced through by one hole. Lines 4 and 5 on a page. Extent in ślokas 500. Character, Newárí. Appearance, old. Date ? Verse. Incorrect. Incomplete

The MS. begins with the 10th leaf. It treats of the Saṭkrama, *i.e.*, the six cruel incantations of the Tāntrikas—Killing, Stupefying, etc.

In leaf 10. इति उड्डीशमते गदागदयोगः द्वितीयपटलः ।
11 B. ज्वरपटलः समाप्तः ।
12 A. प्रत्यानयनघ्नपटलः समाप्तः ।
12 B. उच्चाटनपटलः समाप्तः ।
14 A. विद्वेषनपटलः समाप्तः ।
14 B. उच्छादनपटलः समाप्तः ।
16 A. जलस्तम्भनपटलः समाप्तः ।
17 A. अग्निस्तम्भनपटलः समाप्तः ।
18 B. अदृश्यनपटलः समाप्तः ।
19 B. अञ्जनप्रयोगपटलः समाप्तः ।
20 A. साधनपटलः समाप्तः ।
21 A. पादप्रचारपटलः समाप्तः ।
22 A. उन्मादयनीकरणपटलः समाप्तः ।
23 B. केशरञ्जनयोगा समाप्तः ।
25 B. गर्भनाशनयोगा समाप्तः ।
26 B

DR. RUPNATHJI( DR. RUPAK NATH )

30 B. रसायनाधिकृत समाप्तः ।

31 A. राज्यकरणयोगा समाप्तः ।

32 A. इति स्त्रीयोगमाला उड्डीश नाम शास्त्र समाप्तः ।

43 B. विष्णुक्रान्ता च सर्पाक्षि भावयेच्च पुनः पुनः
तेन कृत्वा तु तिलकं सुरासुरं वशं नयेत् ।
ओं त्रैलोक्यमोहिनी सर्व्वभूतवशीकरणी ह्रीं स्वाहा । अनेन अष्टोत्तर-
शतं पठित्वा स्वपयेत् ततो तिलकं कारयेत् सुरासुरमपि वशीकरोति ।

45 B. उड्डीशवशीकरणपटलः समाप्तः ।

III 360 F. चाङ्गी । 121 × ½ inches. Folia 31, pierced through by one hole. Lines 6 on a page. Extent in slokas 700. Character, old Newári. Date N.S 282 = 1162 A.D. Verse. Correct. Complete.

संवत् २८२ फाल्गुन शुक्लचतुर्थ्यां सोमवारे श्रीमन्महाराजाधिराजपरमेश्वर परम-
भट्टारकश्रीआनन्ददेवविजयराज्ये ।

III. 360 G. पद्मनाभसंग्रहः । 12 × 2 inches. Folia 29, pierced through by one hole towards the left-hand side. Lines 5 on a page. Extent in slokas 600. Character, Bengali. Prose. Correct. Incomplete. Date N.S. 366.

The MS. is defective, as it has not the following leaves—3-9, 13-17, and 20—21.

It begins नमस्कृत्य महादेवं गुरुं संसारतारकम् ।
तिथ्यादीनां विवेकार्थं मुनिवाक्यं समुच्चितम् ॥
पक्षवृद्धौ तिथिद्वेधे ह्रासवृद्धिषु संशयः ।
सुधियामप्यनुष्ठानमतो मया विविच्यते ॥
त्रिंशद्दिनैः सावनो मासः ।
उक्तञ्च ब्रह्मसिद्धान्ते ॥
चान्द्रशुक्लादिदर्शान्तः सावनः त्रिंशता दिनैः ।
एकराशौ रविर्यावत्कालं मासस्य भास्करः ॥

The End. दशाक्रियामुपक्रम्य आवसथं समापितम् ।
प्रेताशौचं तथाख्यातं मुनीनां दर्शनादिकं ॥
सन्देहानेकगम्भीरं श्लोककर्म्ममहार्णवम् ।
इति श्रीवाराणस्यां योगीश्वरसंग्रहपद्मनाभसंग्रहो समाप्तो । श्रीरस्तु
नयपालदेशीयाभिलिख्यमान सम्वत् ३६६ वैशाख शुक्ल ३ रवौ रम्ये
दिनोत्तमे ॥ पुस्तिका स्वस्तिकारिका ॥ राजश्रीअभयमल्लस्य राज्ये ॥
भार श्रीअमुकस्य ।

DR.RUPNATHJI( DR.RUPAK NATH )

III. 360 H. सर्व्ववज्रोदका । 11 × 2 inches. Folia 27, pierced through by one hole towards the left. Lines 6 on a page. Extent in ślokas 500. Date N.S. 179 = 1059 A.D. Prose. Character, old Newári. Appearance, old. Incomplete, out of 66 leaves only 27 remain.

The End — महातन्त्रराजादुद्धृता वज्रधातुमहामण्डलोपयिका सर्व्ववज्रोदका नाम समाप्तः । कृतेयं महायज्ञाचार्य्यानन्दगर्भपादैरिति ॥ विलिख्य पुण्यं यत् प्राप्तं मया साधनसंस्कृते अशेषस्तेन लोकोऽयं भूयात् श्रीवज्रसम्भवः अशेषसकलसर्व्वसत्त्वपरमनिर्वाणप्रतिष्ठितार्थेन रत्नाकर्मेण लिखितमिति ।

(N.B.—रत्नाकर्मे । is written in a different hand and in a different ink. Some one apparently attempted to re-ink these faded letters but without much success.)

संवत् १७९ फाल्गुन शुक्ल प्रतिप × × लिखितमिति ॥

After this is written in a different hand in a different ink the Śatākṣari mantra of Vajrasatva.

The first leaf is wanting. From a leaf without pagemark which I suspect to be the 2nd leaf, I take the following extract as explaining the object of the book.

नापि रागविरागरहितमनुपचितधातो विरागसम्भवात् । उपचितधातोः पुनः रागसम्भवात् नापि निराकार × × × स्वस्यैव पुनः सुरताभिलाषात् चक्षुरादिनिमीलनेन प्रयतस्तो विकल्पपरिहारेण च भेदप्रतिभासोपगमे मुद्रोपयोगः निस्फलः स्यादिति । अन्येन च तत् सिद्धेः । न चैवना प्रज्ञारविन्दसंयोगं परमनिर्वृतिरूपा कृतकृत्या सम्पद्यते इति । चेत (?) धर्मभोजनाभ्यां स्नानादिभिरपि तादृक्कृतकृत्या × × नोत्पत्तेरलमिति विस्तरेणेति । आह च तत्साध्यं योगिनीतन्त्रे सहजाख्यं महासुखं । पस्मान्ते भवेत्सुख्यम् विस्तरादौ च यत्नतः ॥ ननु श्रीसमाजादौ योगतन्त्रे हेवज्रादौ कियन्तः अभिषेका अभिमता । तत्र केचिदाहुः श्रीसमाजे त्रयोऽभिषेकाः पठ्यन्ते ॥

Colophon — अभिषेकश्यमनमभिधीयते ।

III. 360 I, 361 G and 402 A. बज्रावलीतन्त्र । 13 × 2 inches. Folia 91, pierced through by one hole towards the left. Lines 6 on a page. Extent in ślokas 3,000. Date N.S. 202. Character, Newári or Bengali. Prose and Verse. Appearance, old. Incorrect.

No. 402 A is a complete MS. while No. 360 I is a dilapidated copy with many leaves missing. It is in Newári character later than No. 402, though it looks older. Prof. Bendall has described this work in Cambridge Catalogue, page 197.

DR.RUPNATHJI( DR.RUPAKNATH )

No 361 G. $8\frac{1}{2} \times 2$ Folia 149, pierced by one hole towards the left. Extent in ślokas, 2,500 Date? Appearance. Character, Newárí. Prose. Incorrect.

श्रीवज्रासत्वाय ।

वन्दे श्रीकुलिशेश्वरं स्मरतारमारोभवारेः पदं
क्रोधाधारतदित्तु मङ्गलगिरो गायन्तु वज्राङ्गनाः ।
श्रीमद्वज्रभृतो महिम्नि जगदाधातु महामण्डले
निष्पत्त्यूर्म्मिमहाभयस्य सहसा वज्रावली मीलतु ।
अन्तर्वहिर्वज्रभृतेव वज्रपरम्पराभिर्ह्रियतां हृदीयं
यज्योतिरन्तस्तिमिरं निरस्य श्रीवज्रभृन्मूर्त्तिमती विभर्त्ति ।
मण्डलादिविधिःशास्त्रुर्विस्तृतः कमनीहृये ।
संक्षिप्य तामिहव्यक्तं ब्रूमः श्लक्ष्णक्रियं क्रमात् ।
किञ्च आचार्य्यैर्ग्रन्थितप्रक्रियास्यापूर्णत्वं न प्रस्तुतत्वं स्फुटोक्तिः ।
क्वापिक्वाप्याम्नाततायुक्तताचेत्यस्माभिस्तद्गुणैर्मेलितेयम् ॥

इह हि दृष्ट्वा जनान् विद्यादिदामपरम्परावद्धबुद्धीन् दुर्व्वारकर्म्मोर्म्मिरयप्रेरणय प्रायशो अपायत्रयेषु अगतिद्वये च सुगम्भीरे संसारे सरिदावर्त्ते अतिदुस्तरे प्रतिशुद्ध-निमज्जनोन्मज्जनैरविभाससमस्वतन्त्रां स्तनुभृतः परमकृपाप्रणयात् समुद्धर्त्तुमुद्धुरैः प्रथमं अर्घ्याद्युपकरणसन्निधापनादिक्रमतो मनोहरविहारादिक्रियाप्रतिष्ठापनादिषु अभिषेक श्रुतचिन्तादौ च यथायोगं अनुष्ठानात् पुण्यसम्भारे ज्ञानसम्भारे च सम्यक्कृततूशाक्याचार्य्यैर्हद्भिः श्रुत्यमन्त्रनीतिनिपुणधीरैर्यामात्सर्व्वोतुसाहशालिभिः कृपालुभिर्यथाक्रमं विहाराद्यर्घादिदानलक्षणं पूर्व्वसेवाप्रयोजनं शिष्यसमूहो भूखननभूशोधन-भूपरिग्रहो विघ्नकीलनं वसुन्धराधिवासनं कलसाधिवासनं देवताधिवासनं मण्डल-सूत्रण रजःपातन कलसन्यासो मण्डलसाधनं देवताधिवासनं प्रतिमादिप्रतिष्ठा पुष्करिण्यादिप्रतिष्ठा आरामादिप्रतिष्ठा शिष्याधिवासनं आचार्य्यप्रवेशः शिष्य-प्रवेशो मालोदकमुकुटवज्रघण्टाद्या अभिषेका त्रिसमयदानं आचार्य्यसेकोमन्त्रसमर्पण-मञ्जनं दर्पणसेकशरत्तेपागुह्यप्रज्ञाज्ञान चतुर्थसेकाः । विद्याव्रतं वज्रव्रतं चर्य्याव्रतं व्याकरण मनुज्ञा आश्वासः अभिषेको होममण्डलोपसंहारो मानसमण्डनं वलिविघ्न निवारणं वज्रघण्टालक्षणमित्यस्मेतिपञ्चाशद्विधयो विधेयाः तत्र शुभे अह्नि पूर्व्वाह्ने वलिदानपुरःसरं विहारादिभूमिः परीक्षणीया तत्र पूर्व्वस्यां अश्वत्थेन आग्नेय्यां मञ्जनं दक्षिणस्यां प्लक्षं नैरृत्यां पलाशं पश्चिमायां न्यग्रोधं वायव्यां शाल्मलिः उदीच्यां वकुलं ऐशान्यां उदुम्बरं अतिकूर्म्मपृष्ठाञ्च भुवं नृत्योद्वर्त्तननाशस्य वाहेतोरिति उत्तरोन्नतां कुलक्षयभयात् पूर्व्वोन्नतां साधकनाशभयान्निम्नमध्याञ्च परित्यज्य या राज्यस्य विद्याधरत्वा-देर्व्वाहेतुरिति ईषदुन्नतमध्यासितामदक्षिणप्लोता चतुरस्रे सदिक् प्रवा सद्दी वितस्ति

DR. RUPNATHJI( DR. RUPAK NATH )

मात्रं तद्गतं खात्वा तया मृदा प्रपूर्य्य सत्वरं गर्त्तं प्रभुता यदि मृत्तिका शुभा भूमिस्तदास्त्रिया पुनस्तन्नर्त्तगां मृदं कृत्वा वितस्तिमात्रेऽस्मिन् गर्त्ते वारिप्रपूरिते शीतलो जीवमतृस्याभ्यां युक्ते इत्यपि कश्चन गत्वा पदशतं आगता च निरीक्षिता ।

पूर्णाम्भोभिः शुभा भूमिः नाना श्रेया हितेप्सुभिः ।
सशब्दमपि यद्यम्बु नागेभ्योभयमादिशेत् ।

III 361 A. आख्यातविचार । $8\frac{1}{2}\times 2$ inches. Folia 14, pierced towards the left. Lines 5 and 6 on a page. Extent in ślokas 150. Date N.S. 540 = 1420 A.D. Appearance, old. Prose. Correct. Character, Newári.

Beginning. ओं नमो वागीश्वराय ॥

मञ्जुघोषं प्रणम्यादौ बालानां बुद्धिवृद्धये ।
शब्दस्थानमभिज्ञानविगमः ( ? ) वेतुकथ्यते ॥
अत्र लडादीनाम् लस्थाने तिबादयः आदेशा भवन्ति ।
ते पुनस्ते लडादयः । लट् लिट् लुट् लृट् लोट् इति पञ्चतेति ॥
लङ् लिङ लुङ् लृङ एते चत्वारः ङितः ।
तत्रैषां नवलकारस्थाने तिबादय आदेशा भवन्ति ॥

The last Colophon. इति तिङ् समाप्त सम्वत् ५४० जेष्ठ १३ शुक्लपक्ष ।

III. 361 B. वामकेश्वरतन्त्र (?) $8\frac{1}{2}\times\frac{1}{2}$ inches. Folia 40, pierced towards the left. Lines 5 on a page. Extent in ślokas 400. Date ? Character, Newári. Appearance, old. Verse. Correct.

Beginning. ओं नम त्रिपुरसुन्दर्य्यै ।

गणेशग्रहनक्षत्रयोगिनी राशिरूपिणीं ।
देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ॥
प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहालाहलोल्लोलकलनाशमकारिणीम् ॥
यदक्षरैकमात्रेऽपि संसिद्धः स्पर्द्धते नरः ।
रवितार्क्ष्येन्दुकन्दर्पशङ्करानलविष्णुभिः ॥
यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्व्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥

The End. पूर्व्वपश्चिमयोर्द्वारे प्राणायामात्मको स्थितो ।
कलामात्रकृततनुभूतानि नव चक्राण्यनुक्रमात् ॥ (śloka 322.)

It treats of the worship of Tripura Sundari.

DR. RUPNATHJI ( DR. RUPAK NATH )

III. 361 C. दशतत्त्वसंग्रह by चित्तिगर्भ । 9×2 inches. Folia 42, pierced by one hole towards the left. Lines 5 on a page. Extent in slokas 400. Date ? Character, Newári. Appearance, old. Verse. Incorrect.

It begins ओं नमो वज्रसत्त्वाय ।

वज्रसत्त्वं गुरुं नत्वा तद्धर्म्मसूनुसंहतिम् ।
दशतत्त्वानि कथ्यन्ते ज्ञानपादक्रमेण तु ॥
रक्षाचक्रञ्च चक्रञ्च जापपेकोद्दठौर्वलिः ।
प्रत्यङ्गिरः पुटोद्घाततत्त्वानि क्रमशोदश ॥
हृन्नरस्तनिजवीजञ्च प्रभाव्यूहे जलतत्कृतिम् (?) ।
कृत्वाभैरवबुद्धादीनाकृष्य पुरतो भिषक् ॥
वन्दनाञ्च तथा पूजा देशनामामनुमोदनां ।
बुद्धादीन् शरणं गत्वा मार्गमाश्रयते ततः ।
बोधचित्तमथोत्पाद्य त्रिविमोक्षं सुखं स्मरेत् ॥

The End. इति सम्पुटोद्घातविधिः ।

दशतत्त्वानि संहृत्य यन्मया सादितं गुणम् ।
दशतत्त्वपरिज्ञाता सम्यक् तेनास्त्वसौ जनः ।
कृतिरियं दशतत्त्वसंग्रहः पण्डितचित्तिगर्भस्येति ।

III. 361 D. रुद्रयामले षष्ठीविद्याप्रशंसा । 9×2 inches. Folia 14, pierced by a hole towards the left. Lines 5 on a page. Extent in slokas 125. Date N.S. 479=1359 A.D. Character, Newári. Appearance, old. Incorrect. Verse.

Beginning. ओं नमस्त्रिपुरायै ।

विद्युत्पुञ्जनिभां नमामि सततं प्राग्भारसूक्ष्माङ्कुराम् ।
मूर्त्तां भग्नमृणालतन्तुनिभया निर्भिद्य लिङ्गत्रयम् ॥
प्राप्योर्द्धञ्च त्रिसर्गभागमुकुलं पीयूषधारारसम् ।
पीत्वा विद्रुतविद्रुमद्रवमयीं शक्तिं परां कौलिकीम् ॥
सुरासुरभुजङ्गाद्यैः मुनीन्द्रैः सिद्धकिन्नरैः
पादाब्जमार्च्चितं यस्या तां नित्यां सर्व्वदा नमः ।

Colophon. इति षष्ठः पटलः ।

इति रुद्रयामले सपादलक्षग्रन्थविद्यापीठावतारे उत्तरभागिनीत्युक्तं न (व) प्रकरणे षष्ठीविद्या प्रशंसायाम् उत्तरषट्कं समाप्तमिति । लिखित-

DR.RUPNATHJI(DR.RUPAK NATH)

मिदं तपोधनश्रीविश्वेश्वरेण युवराज श्रीजयार्ज्जुनस्यार्थेन लिखितम् ॥ अल्पग्रन्था कारणविस्तरा ॥ सं ४७९ श्रावण कृष्णदशमी शिवं भवतु ॥

This contains only 125 verses out of a lakh and 25,000. It was copied by Visvesvara for the use of Yuvaraja Jayárjuna Deva. The scribe says that a long work has been shortened.

III. 361 F. पादमार्ग । 8×2 inches. Folia 4, pierced by a hole towards the left. Lines 5 on a page. Extent in slokas 60. Date ? Appearance, Fresh. Character, Newári. Prose. Incorrect.

Beginning. ओं नमो ब्रह्मणे नमः ।

अथ प्रक्षाल्य पाणिपादौ ॥ बद्धशिरसि । यज्ञोपवीती । आचम्य । तीर्थ आवाहन ॥

In the same MS. There are 14 leaves dealing with the process of Sráddha, dated N.S. 468 = 1348 A.D. The scribe's name is given as Harsapala.

There is another ritualistic work in 26 leaves, which is dated N.S. 567.

III. 362 A दुर्गतिपरिशोधनम् । 12×2 inches. Folia 13, pierced by a hole towards the left of the centre. Lines 6 on a page. Extent in slokas 300. Date ? Character, Newári. Appearance, old. Prose and Verse. Incorrect.

It begins ओं नमः सर्व्वबुद्धबोधिसत्त्वेभ्यः ।

विधूतसर्व्वसंकल्पं भावाभावविवर्ज्जितं ।
शाक्यसिंहं नमस्कृत्य शुद्धं प्रकृतिनिर्म्मलम् ॥
तं श्रोतव्यं प्रवक्ष्यामि सर्व्वदुर्गतिशोधनम् ।
गर्भसारानुसारेण समाधित्रयमुत्तमम् ॥

प्रथमं तावत् योगी विजनमनोनुकूलप्रदेशे मृदुसुकुमारासननिषण्ण सुगन्धमण्डलं कृत्वा पञ्चोपचारपूजा करणीया । ततः सर्व्वधर्म्म नैरात्म्य भावयित्वा आत्मात्मानं ओङ्कारेण वज्रज्वालामलार्कं भावयेत् । तस्य कण्ठे ह्रींकारेण पद्मं तस्योपरिदलाग्रे अकारेण चन्द्रमण्डलम् । तस्योपरि हुंकारेण पञ्चसूचिकं वज्रं । तं वज्रजिह्वया लीनं भवति । वज्रजिह्वेति तेन वज्रजिह्वा भवति । मन्त्रजापसमो भवेत् । हस्त-द्वयस्य मध्ये मित अकारेण चन्द्रमण्डलम् तस्योपरि हुंकारेण पञ्चसूचिकं वज्रम् । तं वज्रं करमध्ये लीनं भवति । वज्रहस्ता भवति । सर्व्वमुद्रा-बद्धतम भवति । ततो रक्षा वज्रः प्रयत्ना कर्त्तव्या । ओं गृह्ण वज्रसमय

DR. RUPNATHJI( DR. RUPAK NATH )

हुं वम् इति ब्रुवन् क्रोधतेरन्तिरी वध्नियात्। क्रोधतेरन्तरीं बद्धा वज्रमालाभिषेकं गृह्णीयात्

Vajra Terentarī means

वज्रवस्त्रं तले कृत्वा छादयेत् क्रुद्धमानसः।
शाकमङ्गुष्ठवज्रेण क्रोधतेरन्तरी स्मृतः॥

This appears to be a very different work from the work of the ame name noticed by Dr. Rajendra Lāla Mitra The present work appears to belong to the Vajrayána school

In leaf 13 A. चतुर्बुद्धप्रसन्नात्मा दद्यात् संबुद्धपूजया
त्रिदिने च त्रिरात्रौ च वज्रसत्वप्रसिद्धये।
एवं भावयमाना वै सर्व्वदुर्गतिशोधनम् मण्डलराजश्रीनामसमाधिः।
शाक्यसिंहं पुरस्कृत्य माण्डलेयं तथागतम्
देवता बोधिसत्ताश्च द्वारपालचतुष्टयः।
सर्व्वदुर्गति उद्धृत्य सर्व्वावरण शोधयेत्
सर्व्व एकप्रयोगत्वात् प्रत्येकं तेन चौतः। कर्मराज श्रीनामसमाधिः।

The work is not complete

Vajracārya Kuvera informs me that there are three works of the name of Durgati-pariśodhana in Nepal The present is a fragment of the largest work, which extends to 2,500 ślokas There are copies of the book in Nepal, but the owners are chary in showing their books The work in prose is 1,200 ślokas in extent and appears to be that noticed by Dr R Mitra The smallest work is a Dhārani, 200 ślokas in extent. It treats of the funeral rites of the Buddhist Bhiksus

III. 362 B. महीरावणवधनाटकम्। 13 × 2 inches Folia 27, pierced by a hole towards the left of the centre. Lines 5 on a page Extent in ślokas, 450 Date N S. 457 = 1337 A D. Character, old Newári. Appearance, old. Prose and verse. Sanskrit and Prakrit Incorrect.

It ends पात्रश्रीजयश्रीहमल्लवर्म्मणः कुतूहलपूरणाय॥ कविकमलभास्कर पण्डित श्रीजयतविरचितो महीरावणवधनामनाटकः परिसमाप्तः। सप्तपञ्चशतोऽधिकचतुरशत। श्रेयोऽस्तु सम्वत् ४५७ श्रावणकृष्णा-द्वादश्यां पुष्यनक्षत्रे। परिधयोगे॥ शनैश्चरवासरे॥ पुस्तकमिदं समाप्तम्. इति॥ परमभट्टारकपरमेश्वरपरमवैष्णवपरमदैवताधिदेवपरममहेश्वररघु-कुलतिलकभूपालपरम्परापरिनमितमौलिशिखाप्रसूनसंधूपितपदारविन्द-श्रीपशुपतिदेवतावरलब्धप्रसादैकमहाराजाधिराजसप्रक्रियराजराजेन्द्रश्री-श्रीजयारिमल्लदेवानां विजयराज्ये नेपालमण्डले॥

DR.RUPNATHJI( DR.RUPAK NATH )

न चाहं शास्त्रकर्त्ता च न च शब्दार्थचिन्तकः ।
यादृशं स्थितमादर्शे तादृशं लिखितं मया ॥
उत्तरविहारकुटुम्बोद्भवश्रीह्लालविहारप्रधानाङ्गमहापात्रश्रीजयसीह-
मल्लवर्म्मभिः स्वार्थहेतुना स्वहस्तेन लिखितम् ।
वालमूर्खविदंशस्यवारितैलाग्नितस्करात् ।
रक्षितव्या यथाशक्ति पुस्तिका स्वस्तिकारिणी ॥
भुग्नपृष्ठकटीग्रीवं स्तब्धदृष्टि रधोमुखं ।
दुःखेन लिखितं शास्त्रं पुत्रवत् प्रतिपालयेत् ॥
भ्राम्यद्गङ्गागभीरप्रवलरयमिलल्लोलकल्लोलमाला-
श्रेणीगङ्गावदातो विजयति विलसत्कोटिपूर्णादिकूटः ।
नृत्यारम्भे प्रमोदालसदमलजटाजूटकोटीवशाद्यो
काली शृङ्गारचेष्टाचयचकितवपुः पातु वः चन्द्रमौलिः ॥
शुभमस्तु सर्व्वजगताम् ।

This dráma was composed by Jayata, a poet, at the request of Jaya Sinha, a minister of Jayārimalla Deva of Nepal It was copied by Jayasinha himself in the Nepal year 457—1337 A D.

It begins श्रीं नमो नाट्येश्वराय ।

स्वेच्छाचित्रमजृम्भमानमहिमागम्भीरभीमप्रभो-
र्लक्ष्मी मुग्धमुखेन्दुपत्रपटिमाभ्राजच्चकोरापरः ।
विश्वव्यापिविशुद्धकीर्त्तिकुमुदीमालामलाडम्बरः
सानन्दं भगवान् त्रिलोकशरणम् नारायणः पातु वः ॥
अपि च ॥
स्फूर्ज्जत्भोगिकुलाग्रमिश्रजलधेः पातालमूलालयात्
गर्ज्जद्घोरकठोरघोणकुलिशप्रोत्तुङ्गदंष्ट्राङ्कुरैः ।
मज्जद्भूमितलं धृतं करुणया कालेन लीलायितम्
त्रितयं भुवनत्रयस्य शिरसा वन्दे मधूनो रिपुम् ॥
नान्द्यन्ते सूत्रधारः ।
श्रीसुगुह्येश्वमहं नमे शतमुखं वैश्वानरं पावनं ।
याम्येशञ्च नमामि नम्रशिरसा प्रेताधिनाथं नमे ॥
नैर्ऋत्यमशतो वरञ्च पवनं × × × ।
अहं भवस्य शुभदं सर्व्वात्मनासौम्यदं ॥
× × × × ×

भगवतः श्रीसुगुह्येश्वरस्य प्रतिहतप्रतिसरत्यात्रोत्सवप्रसङ्गेनायातानां प्रमुदित-हिजराजपुत्रादीनां समाजः ॥ इत्यादि ॥

DR. RUPNATHJI( DR. RUPAK NATH )

श्रीमत्पात्रपवित्रसूर्य्यनिवहाः सत्कीर्त्तिभोजार्णवा
एते शास्त्रविशारदा द्विजगणा सत्यार्थगाढाशयाः ।
एते साधुजनाः प्रदानसुमुखाः शीलाम्बरालङ्कृता
विद्वत्वर्गवराः श्रुतादिपटवो भान्ति ध्रुवं सुस्थिते ॥

आकाशे कर्णं दत्वा । किमादिशन्ति सन्तः ॥ सकलसीमन्तिनीकर्णावतंसचक-लार्थिमुखकमलकुट्मलप्रबोधभास्करविविधविवेकधागरावगाहनपण्डितप्रत्यर्थिपार्थिव-मत्तकुञ्जरदमनांकुश उत्तरविहारमहापात्रपादै नः समादिष्टा गीतिसभासभ्यसंरञ्जनार्थम् ॥ स्मरणसमीनीय ।॰ अस्ति कवेः कविकमलभास्करस्य जयतस्य कृतिरभिनवमहीरावस वधो नाटकः प्रवर्त्तयितव्यः ॥'

III. 362 C. नागरकसर्व्वस्व । 13 × 2 inches. Folia 37, pierced by a hole towards the left of the centre. Lines 5 on a page. Extent in slokas, 487. Date? Character, Newárí. Appearance, old. Verse. Correct.

Already fully described in page 109 of my Nepal Catalogue. In the MS. the last leaf is wanting. The complete MS. is in the Durbar Library, No. 1648.

III. 362 D. वज्रयोगिनी साधनम् । 10½ × 2 inches. Folia 6, pierced by a hole towards the left of the centre. Lines 6 on a page. Extent in slokas 108. Date N.S. 274 = 1154. Character, Newárí. Appearance, old. Prose and verse. Incorrect.

The End. इन्द्रभूतिक्रमवज्रयोगिनीसाधनं समाप्तम् कृतिराचार्य्यविजयवज्रस्य ।
सम्वत् २७४ कार्त्तिक कृष्ण त्रयोदश्यां श्रीः ।

It begins ओं नमो वज्रवाराह्यै ।
मध्यमोत्तमश्वासेन गम्भीरकर्षितेन तु
कुलिकां पूजयेन्नित्यं योगी कालविशेषतः ।
इति तन्त्रान्त × मध्यमोत्तमश्वासेनेत्यादि इह मध्यमा अवधूती । आलीकाल्योर्मध्ये अग्निरेखा प्रवाहिनी । तस्याश्वासा यच्छताधिके कवि × त्रिसहस्राणाम् मध्ये । अहोरात्रेण द्वादशलग्नसंक्रान्तिषु पञ्चसप्ताधिकषड्दशसंख्याशेषाय च सपादनवशताधिकम् विंशति-सहस्रसंख्या ललनारसनाप्रवाहिणः प्रत्येकम् वृषभादौ समलग्ने । तयोराद्यम् ते श्वासा प्रत्येकम् संक्रान्तिकाले समविषमलग्नयोर्मध्ये मध्यमाया अवधूत्याः सपादपञ्चाशत्संख्या अधमा प्राणिनां मृत्यु-दायका । कुलिकाकारसम्भूता खरस्वभावा । अरिष्टमरणवञ्चका कालाग्निप्रवाहित्वात् । शेषा षट्पञ्चाशत् ध्रुवा ललना रसना पञ्च-पञ्चमण्डलवाहिनः । अष्टादशशतश्वासाः तेषु प्रत्येकमण्डलवाहिनः

DR. RUPNATHJI(DR. RUPAK NATH)

षट्छ्रत्तरशतत्रिंशत्संख्या सपादैकादशश्वासोना। अत्र मण्डलानि आकाशादीनि पञ्च ललनायाः पृथिव्यादीनि पञ्च रसनायाः। इह नाभिपद्मदले यथासंख्यं अधोपूर्ववामे पश्चिमे दक्षिणे आकाशवाय्वग्नि-तोयपृथिवीमण्डलानि। कर्णिकाया विषुवपुं चन्द्रयो र्यथा मध्ये ऊर्द्धे मध्ये वामे अधो यथाक्रमेण वामे शून्यादिकं दक्षिणे भूम्यादिकम् षट्सु नासारन्ध्रयोः यौगपद्येन सपादषट्पञ्चाशत् श्वासात्मकमिति।

Leaf 3 B. इति मध्यमोत्तमश्वासभेदेन कुलिकापूजाविधिः समाप्तः। लौकिक लोकत्तरसत्येन भगवतोक्त इति।

ॐ नमः श्रीवज्रयोगिन्यै।

श्रीवज्रसम्बरं वन्दे सर्व्वसत्त्वात्मकं विभुम्।
शून्यताकरुणाभिन्नं सहजानन्दस्वरूपम्॥

आदौ तावत् उत्पादितबोधिचित्तयोगी मनोनुकूले देशे अवस्थितः पश्चिमाभिमुखः ध्यानस्थाने उत्पादितो क्षियान (?) महाश्मशानादिमोक्षः नग्नो मुक्तकेशः अथवा रक्तवस्त्रपरिधायी रक्तमुकुटी सेवितपञ्चामृतः प्रथमतः चतुर्ब्रह्मविहार भावयेत्। ततो झटिति वक्ष्यमाणदेव्यहंकारेण चतुश्चतुरहङ्कारान् चतुर्दिक्षूच्चार्य्य समन्ततो वज्रप्राकारवज्रपञ्जरं भावयेत्। अथवा शुम्भनिशुम्भादिचतुर्मुखमन्त्रेण रक्षां विदध्यात्। ततः सर्व्वधर्म्मनिरवलम्बनं शून्यतां विभाव्य मन्त्रमुच्चारयेत् ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहमिति। ततः शून्ये अकारात् हेतुवज्रपरस्वभावात् पृथिव्यादिचतुर्महाभूतस्वभावः यं रं वं लं कार परिणतम् चतुरत्नमयं सप्तपर्वतसप्तसीताकल्पवृक्षद्वादशद्वीपपरिकरितम् सुमेरुं भावयेत्। तन्मध्ये हरितहुङ्कारपरिणतम् पञ्चाङ्गुलस्वभावम् विश्ववज्रं तन्मध्ये रक्तएकारपरिणतलोहितवर्णशरीरस्वरूपम् ऊर्द्धधर्म्मोदयं त्रिकोणम् वज्राङ्कितम् ज्वालामालासहितम् नवद्वारस्वभावाष्टदलपद्मसव्योपरिस्थं दन्तं चतुर्नाडीस्वभावं चतुर्द्दलकमलोपरि चण्डांशुमण्डला अवधूतीस्वरूपशूकतीपरिणतां वज्रयोगिनीं किंशुकपुष्पसन्निभां स्फुटतरपीतलोहितां शोभनार्थां सुकुमारयौवनां ललितक्रोधमुखीं पञ्चमुद्रामुद्रितां पञ्चाशतनरशिरोहारधरां आलीढचरणाक्रान्तचतुर्मुखविशुद्धब्रह्मेन्दुहरिहरां वैरोचनमुकुटिनीं प्रथमदक्षिणवामकरतलकलितवज्रवज्राग्रे पादालिङ्गनाभिनया पुनर्दक्षिणकरे कर्त्रीवामाकरलितोर्द्धनभस्तलविलसत्कपालनिविष्टदृष्टिं वामाङ्कखट्वाङ्गसङ्गतां तदनु ज्वालामुद्रां वद्ध्वा फेत्कारशब्देन वीरवीरेश्वरीपरिवृत्तम् ज्ञानचक्रं पुरो दृष्ट्वा पारदेशनादिकं कृत्वा अमृतस्वादादिना सन्तर्प्य अङ्कुशमुद्रां वद्धा अःकारत्रयेण प्रवेशयेत्।

III. 362 E. हरिश्चन्द्रोपाख्यानम्। 13 × 2 inches. Folia 24, pierced by a hole towards the left of the centre. Lines 5 on a page. Extent in slokas 432. Date ? Appearance, old. Character, Newári. Verse. Incorrect.

DR.RUPNATHJI( DR.RUPAK NATH )

The story of Hariscandra is given in the form of a Purāṇa, in which Agastya and Vaisampāyana are the first interlocutors, and Ráma and Hanumán are the second interlocutors. A Kuṭṭini comes to tempt Hariscandrá's wife in her distress.

The MS. belonged to that Jayasiṃha, at whose instance Mahi-Rāvaṇa Nāṭaka was written. The date of copying is N.S. 195.

सम्वत् ४९५ माघकृष्णपञ्चम्यां तिथौ स्वातिनक्षत्रे ध्रुवयोगे सोमवासर दिने समाप्तमिदं + + लिखित श्री नेपालदेशे श्री श्री श्री श्री पशुपतिपटनात् दक्षिणस्यां दिशि श्रीवाघमत्यायाः दक्षिणकुले श्री ललितपुरे श्रीमाणिगलोत्तरविहारे ।

as in Mahi-Rāvaṇa Badha Nāṭaka

III. 362 F कालज्ञान । 12 × 2 inches. Folia 3, pierced by a hole towards the left of the centre. Lines 4 on a page Extent in slokas 17. Date ? Character, Newári Appearance, old Verse. Incorrect.

It begins श्री नमः शिवाय ।

देहस्थः सकलो ज्ञेयो निष्कलो देहवर्ज्जितः ।
व्याप्यव्यापकरूपेण सर्व्वतः स व्यवस्थितः ॥
हंस हंस इति यो ब्रूयात् हंसोदेवः सदाशिवः ।
गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्व्वतोमुखं ॥
तिलानाञ्च यथा तैलं पुष्पगन्धसमाश्रितः ।
पुरुषस्य शरीरेऽस्मिन् सवाह्याभ्यन्तरे स्थितः ॥
उल्काहस्तो यथा कश्चित् द्रव्यमालोक्य तां व्रजेत् ।
ज्ञानेन ज्ञेयमालोक्य तथा ज्ञानं परित्यजेत् ॥
पुष्पं तु सकलं विद्यात् गन्धस्तस्यैव निष्कलः ।
वित्वं तु सकलं विद्यात् छाया तस्यैव निष्कला ॥
सकलनिष्कलभावेन सर्व्वत्रैवं व्यवस्थितः ।
सकलैः सकलं विद्यात् निष्कलैर्निकलं तथा ॥
त्रिमात्रश्च द्विमात्रश्च एकमात्रस्तथैव च ।
अर्द्धमात्रा परा सूक्ष्मा स्वामात्रूर्द्ध्वं परापरम ॥
ब्रह्माविष्णुश्च रुद्रश्च महेश्वरः शिव एव वा ।
पञ्चमः पञ्चदेवेभ्यः सकलः परिपठ्यते ॥
ब्रह्मा च हृदयस्थाने कण्ठे विष्णुः समाश्रितः ।
तालुमध्ये स्थितोरुद्रः ललाटस्थमहेश्वरम् ॥
नासाग्रन्तु शिवं विद्यात् तस्यान्तन्तु परापरम् ।
परात् परतरं नास्ति इति शास्त्रस्य निश्चयः ॥

DR.RUPANATHJI( DR.RUPAK NATH )

गमागमं कथं तस्य केन वा नीयते तु सः ।
संशयो मे महादेव कथयस्व यथार्थतः ॥
नीयते शक्तिना जीव तस्मिन् प्राप्य निवर्त्तते ।
तस्मान्तं संप्रवक्ष्यामि शृणु षण्मुख तत्त्वतः ॥
देहातीतं तु तं विन्द्यात् इदं तद्द्वादशाङ्गुलम् ।
अन्तस्थं तं विजानीयात् तनुस्था व्यापयेत् प्रभुः ॥
मनोप्यनात्र निक्षिप्तं दृष्टिप्यनात्र पातिता ।
तथापि योगिनां योगः अव्युच्छिन्नः प्रवर्त्तते ॥
एतत्तत् परमं गुह्यं एतत्तत् परमं पदं ।
एतत्तत् परमं ब्रह्म एतत्तत् परमान्तरम् ॥

It ends  इति कालज्ञानं श्रीमहेश्वरभाषितम् समाप्तम् ॥

For a larger work see Nepal Catalogue of 1905, p. 80, and the Preface lix.

III. 362 G. महासंवर्त्तनकथा By सर्व्वरक्षित । 12 × 2 inches. Folia 26 (first 2 leaves are missing), pierced by a hole towards the left of the centre. Lines 6 on a page. Extent in slokas 534. Date N.S 544 = 1424 A.D Appearance, old. Character, old Newári. Correct.

It ends  सूक्तं यदेव भवितात्र तदेव वोढुम् ।
स्याश्चेत् क्वचिदुक्तमपि किञ्चन × × दोषः ॥
आलोकमेव वितनोति सदैव भानुः ।
चक्षुःप्रभावहरणन्तु तमस्तवीयम् ॥
अभ्यासविधिना वचनेन बोद्धे ।
पुण्यविशुद्धिशुभगं यदुपार्ज्जितं मे ॥
तेनाधिगम्य निखिलान् स्वयमेव भावान् ।
कुर्वन्तु नृणां करगतामिव वेशयेयम् ॥
गुह्यपूर्वक्रमनाम चरमो विश्रामः
समाप्त इति
षट्पञ्च विचित्रार्थकाव्यम् । समाप्ता महासंवर्त्तनकथा ।
कृतिराचार्य्यश्रीभदन्तसर्व्वरक्षितस्य महाकवेः । वृत्तानि दशोनानि चत्वारिंशतानि । अनुष्टुप्छन्दसा गण्यमानानि पञ्चशतानि चतुस्त्रिंशदधिकानि ग्रन्थ ५३४ । ये धर्म्मा etc., . . . . . शुभमस्तु सर्व्वप्रजानाम् । सम्वत् ५४४ आषाढ़ ।

DR.RUPINATHJI( DR.RUPAK NATH )

Leaf 3 B. ओँ कुमारोदयो नाम द्वितीयः विश्रामः ।
4 B बुद्धत्वाधिगमोनाम तृतीयः विश्रामः ।
5 B तीर्थ्यपराजयोनाम चतुर्थ विश्रामः ।
प्रथमञ्च निदानकाण्डम् ॥
6 B. द्वितीयकाण्डे आकाशस्यदेवोदयःनाम प्रथमः विश्रामः ।
7 B द्वितीयकाण्डे पृथिवीनिवासो नाम द्वितीयः विश्रामः ।
8 B. द्वितीयकाण्डे नगेन्द्रवासिदेवोदयो नाम तृतीयः विश्रामः ।
9 A मर्त्यादयोनाम चतुर्थः विश्रामः ।
द्वितीयञ्च विवर्त्तनानावस्थाकाण्डम् ।
10 B तृतीयकाण्डे आहारोदयो नाम प्रथमः विश्रामः ।
12 A. तृतीयकाण्डे वर्त्तनोपायारम्भः नाम द्वितीयः विश्रामः ।
13 B. ” वर्णविभागोनाम तृतीयः विश्रामः ।
14 B. ” विविधोपकरणोदयो नाम चतुर्थो विश्रामः ।
तृतीयञ्च विवृत्तावस्थाया एकान्तसुखोपस्थानकाण्डम् ।
15 B. चतुर्थकाण्डे पर्य्येषणारम्भो नाम प्रथमो विश्रामः ।
16 B ,, कलिप्रवेश नाम द्वितीयो विश्रामः ।
18 A. ,, अन्तरसंवर्त्तवृत्तान्तो नाम तृतीयो विश्रामः ।
18 B. ,, कल्पैकादशवृत्तान्तो नाम चतुर्थविश्रामः ।
चतुर्थञ्च विवृत्तावस्थायां सुखदुःखावस्थानकाण्डम् ।
19 B. पञ्चमकाण्डे सत्त्वसंवर्त्तोनाम प्रथमः विश्रामः ।
21 A. ,, सूर्य्योदयोनाम द्वितीयो विश्रामः ।
21 B. ,, धातुसंवर्त्तो नाम तृतीयो विश्रामः ।
22 B ,, संसारोद्वेजना नाम चतुर्थविश्रामः ।
पञ्चमञ्च संवर्त्तमानावस्थान काण्डम् ।
23 A. षष्ठकाण्डे संवृत्तावस्थाननयो नाम प्रथमो विश्रामः ।
23 B. ,, द्विसंवर्त्तनानयो नाम द्वितीयो विश्रामः ।
24 A. ,, भंग्यार्थद्योतनो नाम तृतीयो विश्रामः ।
25 A. ,, given above.

The following is the text of the 4th Viśrāma of the 4th kāṇḍa :—

दृष्ट्वान्योन्यमथोमर्त्त्या प्रीता स्निह्यन्ति मित्रवत् ।
संदधद्भ्रमः कल्पस्तान् प्रतीतिः भविष्यति ॥
शुभमाङ्गल यास्यन्ति शेषमर्त्त्या इवग्रहा ।
वीतदोषा भविष्यन्ति मुनेः शिष्या इवर्त्तवः ॥

DR. RUPNATHJI( DR. RUPAK NATH )

वाह्याध्यात्मिकभावेषु गतेष्वेवं समात्मतां ।
धर्म्मस्य भवितैश्वर्य्यं सुखस्यैव निरत्ययम् ॥
भवितारोऽन्यमर्त्त्योर्घ्वास्तुङ्गा सुङ्गाश्च दैहिनः ।
विंशत्यब्दसहस्रायुः तद्धिताद्द्विगुणायुषः ॥
अप्रोत्कर्षवतां नृणां गृहलक्ष्मीरिवैषिता ।
पञ्चवर्षशता कन्या वरेया भविष्यति ॥
आयुषानुगुणं तेषां भावि रूपादिसौष्ठवम् ।
समन्ततो सुखं पुण्यम् किमिष्टं न समाक्षिपेत् ॥
कुक्कुटाश्रयदेशस्थे जगत् ग्रामैर्निरन्तरम् ।
आकाशमिव नक्षत्रैः शोभां धास्यति भूयसीम् ॥
एकान्तशुद्धतां गन्तु जानतेव वसुन्धरा ।
यथा नीरा खिला मेध्या अल्पशः कृत्वा शंमिष्यति ॥
सुखपक्षे समुन्नते सुपक्षेऽधो निमंक्ष्यति ।
दुःखमेष्यति पञ्चत्वम् दुःसहो हि रिपूदयः ॥
सर्व्वसम्पत्सहायेन सुखेन वाभिसर्पिता ।
विप्रोषितस्य दुःखस्य स्मरिष्यन्त्यपि नो जनाः ॥
+ + + + +
सोऽयं विवृत्य इति तिष्ठति लोकधातुः ।
सूर्य्योदयात् प्रभृति विंशतिमेव कल्पान् ॥
एतावतोदयनखेदमिद्धोपनीय ।
प्रस्थास्यते प्रलयधातो इवोपरिष्टात् ॥

III. 362 H. महाकौलज्ञानविनिर्णयः By मत्स्येन्द्रपाद or मच्छघ्नपादा। 12×2 inches. Folia 35 (first two leaves missing), pierced by two holes to the right and left of the centre. Lines 6 on a page. Extent in slokas 726. Date ? Character, Transition Gupta Apppearance, old. Verse. Correct.

It ends मांसपलं वलिं देया ताम्बूलं चन्द्रसंयुतम् ।
धूपञ्चन्दनसौरभ्यं अगुरुं मृगनाभिकम् ॥
रक्तपुष्पं विशेषेण सुगन्ध × × ।
उग्राणि यानि पुष्पाणि गन्धहीनं न दापयेत् ॥
वहिस्थं पूजनं प्रोक्तं आध्यात्मं शृणु साम्प्रतम् ।
रक्ताम्बरधराः सर्व्वे रक्तगन्धसुलेपनाः ॥
षोड़शाकृतयः सर्व्वे + + विभूषिता ।
प्रसन्नवदनाश्चैव पिवन्तं मदिरासवम् ॥

DR.RUPNATHJI( DR.RUPAK NATH )

इच्छारूपधराः सर्व्वे जरामरणवर्ज्जिताः ।
सृष्टिप्रवर्त्तकाः सर्व्वे वरदानेकतत्‌पराः ॥
× × दाध्यायेत्‌ प्रचिरात्‌ तत्समो भवेत्‌

Colophon. इति ज्ञाननिर्णये महायोगिनीकौलश्रीमत्‌स्येन्द्रपादावतारिते चन्द्रद्वीप-विनिर्गते चतुर्विंशतितमः पटलः ।

Post Colophon. गुह्यपदपरं प्रोक्तं दशकोटिसुनिश्चयः ।
सिद्धानां योगिनीनाञ्च हृदयं परमदुर्लभम्‌ ॥
गुह्यात्‌ गुह्यतरम्‌ नाथेः सारात्‌ सारतरं परम्‌ ।
सम्यगेतत्‌ मया भद्रे अप्रकाशं प्रकाशितम्‌ ॥
महाकौलं महादेवी शते दशभिः समितम्‌ ।
ज्ञानस्य निर्णये सारमाष्टासाहास्त्रिकं मतम्‌ ॥
इति महाकौले ज्ञाननिर्णये सारम्‌ श्रीमत्‌स्येन्द्रपादा . . . .

Leaf 3 A. इति ज्ञानस्य निर्णीतियोगिनीकौलम्महत्‌ श्रीमच्छुग्नपादावतारिते चन्द्रद्वीपविनिर्गतः प्रथमः पटलः ।

3 B. × × × × द्वितीयः पटलः ।

देव्युवाच ।

पञ्चाग्नितापसन्तप्तवर्षकोटिरनेकधा ।
तपस्तपश्चसे सम्यक्‌ त्वत्‌प्रसादेन भैरव ।
सृष्टियोगं मया ज्ञातम्‌ संहारं कथयस्व मे ।

भैरव उवाच ।

साधु त्वा कथयिष्यामि संहारन्तु यथा भवेत्‌ ।
कालाग्निरुद्रसंज्ञातु नखाग्रे नित्यसंस्थितम्‌ ॥
यदा प्रोज्ज(ल)ते ऊर्द्ध्वं संहारन्तु तदा भवेत्‌ ।
वड़वामुख(मध्य)ञ्च पाताले सहसोत्थितम्‌ ॥
सप्तपातालपृथिवी तस्योर्द्ध्वं स्वर्गसंस्थितम्‌ ।
एतानि कथिता सर्व्वे भुवनानि चतुर्द्दश ॥
ज्ञातव्या देहमध्ये तु तत्त्वरूपा स्थिता प्रिये ।
सर्व्वेषा ( मम ) संलीनं लयञ्च शक्तिगोचरः ॥
शिवमध्ये गता शक्तिः क्रियामध्ये स्थितः शिवः ।
ज्ञानमध्ये क्रिया लीना क्रिया लीयति इच्छया ॥
इच्छा शक्तिः लयं याति यत्र तेजः परः शिवः ।
संहारन्तु इमं भद्रे कथितं तव शोभने ॥

DR.RUPNATHJI(DR.RUPAK NATH)

संहारन्तु यदा नास्मम् कुल संहरते जगत् ।
सृष्टियोगं यदा नास्मम् सृजत्येव चराचरम् ॥
अधस्तात् संस्थिता भूमि ऊर्द्ध मूर्त्ति वरानने ।
पूर्व्ववत् सूचितं देवि सृष्टियोगं मया तव ॥
सृष्टिसंहारन्यायेन कुलार्थमुपवर्णितम् ।
किमन्यं पृच्छसि नाथ सुगोप्यं प्रकटीकृतम् ॥
इति + + + + द्वितीयः पटलः ॥

देव्युवाच ।

कुललक्षम् महेशानि आत्मसम्बित्तिपूर्व्वकं ।
एतन्मे संशयो नाथ प्रसादी भव शङ्करः ॥

भैरव उवाच ।

शृणु मे एकाग्रचित्ता कुललक्षं निगद्यते ।
यतत्र दृष्टिः मनस्तत्र भूतेन्द्रिय समुन्नते ॥
स्वशक्तिजीवभूतानि दृष्टिलक्षलयं गता ।
स्थानं ध्यानञ्च वर्णञ्च लक्षणञ्च चतुष्टयम् ॥
पिठ (?) संज्ञा भवेत् स्थाने ध्यानं तत्पदमुच्यते ।
वर्णरूपं विनिर्दिष्टं लक्षम् हे रूपवर्ज्जितम् ॥
पिण्डञ्चोपपदं रूपं रूपातीतं वरानने ।
स्थाने स्थाने स्थिता देवी एकैकस्य चतुर्विधम् ॥
चतुष्पत्रञ्च अष्टारं द्वादशारम् वरानने ।
× × × ×
× × × ×
कणिकामोरर्युक्तं दीप्यमानं नभस्तले ।
तस्यैव व्यापकं तत्र नित्योदितमखण्डितम् ॥
अनन्तमोत्तमचलम् सर्व्वव्यापी निरञ्जनम् ।
तस्येच्छया भवेत् सृष्टिः लयं तत्रैव गच्छति ॥
तेन लिङ्गन्तु विख्यातं यत्र लीनं चराचरम् ।
अखण्डमण्डलं रूपं निर्विकारं सनिष्कलम् ॥
अज्ञानाबन्धमुद्दिष्टं ज्ञात्वा बन्धैः प्रमुच्यते ।
उन्मनं मनोरहितम् ध्यानधारणवर्ज्जितम् ॥
प्रत्यक्षं सर्व्वदा नित्यं अतसीपुष्पसन्निभम् ।
सर्व्ववर्णमयं देवं सर्व्ववर्णविवर्ज्जितम् ॥
ज्ञानगम्यं महादेवि पारम्पर्य्यक्रमागतम् ।

DR. RUPNATHJI( DR. RUPAK NATH )

कथितं देवि सद्भावं कुललक्षं यथास्थितम् ॥
न काष्ठं मृण्मयं लिङ्गं न शैलरत्नसम्भवम् ।
— — — — — ॥
अष्टादशलोकशास्त्राणि क्रूराश्चाध्यात्मिकास्तथा ।
तैस्तु चेत् पूजितं देवि मनसापि न पूजयेत् ॥
— — — — — ।
ब्रह्माद्यास्तु सुराः सर्व्वे असुराश्च तपोधनाः ॥
यक्षगान्धर्वसिद्धाश्च तृणगुल्मपिपीलिकाः ।
ग्रहनक्षत्रतारादिजगत्स्थावरजङ्गमम् ॥
निष्क्रान्ता विन्दुमध्ये तु लोलीभूतं तु तत्समम् ।
सृष्टिसंहारकर्त्तारम् तल्लिङ्गं सिद्धपूजितम् ॥
स्फुरन्तं निर्म्मलं नित्यम् अप्रमेयं समोदितम् ।
ज्वलन्तमुल्कसदृशं विद्युत्तेजो नभस्तले ॥
एतत् लिङ्गवरं ज्ञात्वा दृष्ट्वा मोक्षस्य भाजनम् ।
पाषाणवृष्टिसङ्घाते महामेघैः सुदारुणैः ॥
नमस्येत् अग्निना लिङ्गं न पातः वज्रताडितम् ।
एतत्तु पूजयेत् देवि कौलिकं सिद्धिमिच्छता ॥
अर्च्चयेम्मानसैः (पुष्पैः) सः सुगन्धैः धूपदीपितैः ।
अहिंसा प्रथमं पुष्पम् द्वितीयेन्द्रियनिग्रहम् ॥
तृतीयस्तु दया पुष्पं भावपुष्पं चतुर्थकम् ॥
पञ्चमन्तु क्षमापुष्पं षष्ठं क्रोधविनिर्जितम् ।
सप्तमं ध्यानपुष्पन्तु ज्ञानपुष्पन्तु अष्टमम् ॥
एतत् पुष्पविधिं ज्ञात्वा अर्च्चयेत् लिङ्गमानसम् ।
भुक्तिमुक्तिमवाप्नोति देहलिङ्गार्च्चने स तु ॥
सिद्धलिङ्गमिदं देवि देहस्थं प्रत्ययान्वितम् ।
मनोलिङ्गं सदा ध्यायेत् यां यां फलसमीहते ॥
तां लभते न सन्देहो आत्मसम्वित्तिपूर्व्वकम् ।
एतत्तु कौलिकं देवि देहलिङ्गस्य लक्षणम् ॥

III. 363 A. 11½×2 inches. Folia 14, pierced by a hole towards the left. Lines, 8 on a page. Extent in ślokas, 600. Character, Newári. Date? Appearance, old. Prose. Incorrect.

Beginning. नमो बुद्धाय ।

हस्तिदन्तचूर्णं अमला अन्तर्धूमेन दग्ध्वा तैलं पचेत् । अभ्यङ्गात् खल्व-टङ्कः कुञ्चितकेशो भवति ॥ करिदन्तचूर्णं अमलाचूर्णं भृङ्गराजरसेन

DR RUPNATHJI( DR RUPAK NATH )

तैलं पचेत्। लेपात् कुञ्चितकेशो भवति॥ रसाञ्जनकरिदन्तअजादुग्धेन सहलेपात् कुञ्चितकेशो भवति॥ गुञ्जादलं त्वक्पटुकमांसी एषां पिष्ट्वा भृङ्गराजरसेनतैलं पचेत्। केशप्रचुरतर भवति॥ भलातकवृहतीदल-मूलं वा मधुना सह लेपात् मलायिखट्टां नाशयति॥ मन्दारपुष्पं कृष्णा-गाभीमूत्रेण लेपात् मलायिखट्टां नाशयति॥ वृहतीफलरसेन गुञ्जामूलं वा लौहमलेन सह पचेत् मनायिखट्टां नाशयति॥ अश्वगन्धामूलं नीलोत्पलपुष्पं त्रिफलावहेडादलममी (?) मधूफल वल्कलम् प्रियङ्गु। एषां पिष्ट्वा लेपात् केशो नोत्पटति। अमलाकटजः पलमांसी वच एषां पिष्ट्वा शिरसि लेपात् × घनकेशो भवति। अम्बवीज अमला समभागं कृत्वा स्नानकाले शिरसि लेपात् केशोनोत्पटति। नीलोत्पल-नागकेश यष्टीमधु अमला एषां पिष्ट्वा समभागं शिरसि लेपाद्बुहि नाशयति। मासचूर्णं अर्कदुग्धेन भाव्यम्॥ एकविंशतिवारान् सुखावयित्वा मूत्रधूमेन दग्ध्वा कटुतैलेन लेपात् केशरोगान् नाशयति॥

The End. कृतिरियम् आचार्य्य श्रीनागार्जुनपादानामिति।

After the end, begins another work, of which only five lines are to be found in this MS. as

नमो बुद्धाय।

नागार्ज्जुनं महाप्राज्ञं सर्व्वशास्त्रविशारदं।
सुसंक्षिप्तचिकित्सार्थं आर्य्यदेवो महातपाः॥
कारुण्यात् सर्व्वसत्त्वानां दरिद्राणाम् तथा परम्।
प्रणम्य परया भक्त्या सारं सम्परिपृच्छति॥
कथमल्पोपचारेण रोगोपशमनं भवेत्।
इत्याह भगवान् मण्ड-कल्पं सर्व्वसुखावहम्॥
क्षीरेण यः पिवेत् मण्डं मासमात्रं निरन्तरं।
रसायनगुणस्तस्य भवत्येव न संशयः॥
जीवेत् वर्षशतं पुर्णं सर्व्वरोगविवर्जितः।
दृष्टिपुष्टि यतः श्रीमान् वलिपलितवर्ज्जितः॥
पिवेत् त्रिकटुचूर्णेन सद्योज्वरविनाशनम्।
पीत्वा विडङ्गचूर्णेन दन्तरोगं विनाशयेत्॥
पीत्वा एरण्डचूर्णेन हृदयशूलविनाशनम्।
गुह्यशूलं गुडेनैव शर्करमिश्रितं पिवा॥
जीवा अतिसारमुपशामयेत्॥

DR. RUPNATHJI( DR. RUPAK NATH )

गोमूत्रं मिश्रयित्वा सन्निपातविनाशनम् ।
कच्छकादिचूर्णेन सह कुक्षि......... ॥

Here ends the five lines of Mandakalpa attributed to Nāgārjuna with whose name that of Āryadeva is associated. The main work in this MS. has no name. It appears to be the notes of an Āyurvedic Physician, who attributes them to Nāgārjuna. It is written in very small letters and the Sanskrit is not of the happiest kind.

III. 363 B. $10\frac{1}{2} \times 2$. Folia 13 and 8, pierced by a hole towards the left. Lines, 7 per page. Extent in ślokas, 500. Character, old Newāri. Date ? Appearance, old. Prose and Verse. Correct.

There are two works in this MS. One may be named सेकादिकोद्देशपदम् which runs from leaf 1 to leaf 13 without coming to an end, leaf 1 being written on both sides. The other work is entitled कल्याणकामधेनुविवरणम् and extends from leaf 3 to leaf 10. The first is written in a very old hand and has the look of Transitional Gupta, while the other is old Newāri. It is dated N.S. 224.

The 1st MS. begins —

नमः श्रीपरमादिबुद्धाय ।
नत्वादिबुद्धं त्रिभवैकनाथम्,
सम्बोधिसत्त्वं सह धर्मसङ्घं ।
श्रीमद्गुरोः पादकृतप्रसादात्
सेकादिकोद्देशपदं नमामि ॥

अथ वज्रपाणिनिर्म्माणकायः सुचन्द्रो राजा परमादिबुद्धतन्त्रराजोत्सवार्थं भगवन्तं पृच्छति सुचन्द्र आहेति हे शास्तः सेकः सप्तविधः उदकादिरनुज्ञावसाना । अपरः त्रिविधः कलसादिप्रज्ञाज्ञानान्तः पुनस्तरस्तथेति महामुद्राज्ञानलक्षणम् । लौकिकलोकोत्तरसिद्धयर्थमिति लौकिकसिद्धिसेकानष्टभुवनपर्य्यन्तम् । लोकोत्तरञ्च बुद्धत्वम् महामुद्राक्षरज्ञानम् । एतदर्थसंक्षेपात् कथयस्व मे ममेति शृणिवत्यादि भगवतो वाक्यम् उद्देशसमाप्तिं यावत् । परमिति महामुद्राक्षरज्ञानम् । नाडीनाम् वामदक्षिणमध्यमादीनाम् सञ्चारो वामदक्षिणमध्यरन्ध्रेषुं गमनागमनम् । नाडीसञ्चारम् आयाममिति प्राणायामम् । उद्देशात् ते तव कथयामि । इदानीम् उद्देशादेःप्रभेदमाह । उद्देशः त्रिविधः तन्त्रे सर्व्वस्मिन् । तथा निर्द्देशस्त्रिविधो भवेत् । तदुद्देशनिर्द्देशयोः प्रत्युद्देशमाह । प्रत्युद्देशोमहद्देशः इत्युद्देशस्य प्रभेदः । प्रतिनिर्द्देशकोऽपरः इति महानिर्द्देशः आक्षिप्तः । एतौ च निर्द्देशस्य प्रभेदौ । एषां व्यापारमाह ।

उद्देश एव इत्यादि । X एवं उद्देशः स एव निर्द्देशः । स च तन्त्रसङ्गीति

DR.RUPNATHJI(DR.RUPAK NATH)

उच्यते । अत्र हि निर्द्देशशब्देन वृहत्तन्त्रमस्तीति उच्यते । वृहत्तन्त्रान्तःभूतसम्बोद्देशः स एव हि सङ्गीतिकारकैः पृथक् क्रियते । तदा अन्यतन्त्रो भवति । यथा लघ्वाभिधानात् नियतमन्यतन्त्राभिधानम् । इत्युद्देशश्चेति चकारात् प्रतिपद आक्षेपे प्रतिनिर्द्देश उच्यते । द्वयमेतत् यथाक्रमं अल्पपत्तिका वृहत्पत्तिका । सारपदमात्रभत्तिका । न सर्व्वार्थसूचिका । यतष्टीका सर्व्वार्थसूचिकेति वक्ष्यते । महोद्देशश्चेति चकारात् महच्छ(च्चः ?)महच्छंक्षेपे महा-निर्द्देश उच्यते । द्वयमेतत् यथासङ्ख्यम् अल्पटीका वृहट्टीका चोच्यते । एवमित्युक्तक्रमेण षट्कोटिभिः षड्विधैः अल्पतन्त्रवृहत्तन्त्रसङ्गीत्यादिकैः शुद्धं परिशुद्धं आदिवुद्धं कालचक्रा-भिधानं स्यादिति वक्ष्यमाणेन सम्बन्धः । एवं वज्रयोगैश्चतुर्विधैरिति मन्त्रसंख्यानाद्वय-लक्षणैः चतुःसंबोधिरिति एकक्षणाभिसंबोधिः । पञ्चाकारविंशत्यारमायाजालाभि-संबोधिलक्षणैः स्कन्धैः रूपवेदनासंज्ञासंस्कारलक्षणैः धर्म्मधातुभिः ... ... ... ... ... ... ... सत्याभ्यां लौकिकलोकत्तराभ्यां कायवाक्चित्तसंशुद्ध्या अभिषेकद्वयं द्वयमिति । उदक-मुकुटाभ्यां कायशुद्धिं पट्टवस्त्रघण्टाभ्याम् वाक्शुद्धिं महाव्रतनामाभ्यां चित्तशुद्धम् अनुज्ञाया ज्ञानशुद्धिः अन्यैरपरायाः शुद्धिः । सा धात्वादिशुद्धितः ।

This appears to be a commentary of some work of the Kálcakra-yána School That it treats of secret worship, is apparent from the following —

Leaf 5 A ऊर्द्ध्वाधोरक्तः शुक्रप्रवाहयोः । या अधः स्त्रीणाम् खगमुखा(त्)शुक्र-वाहनः सैव यदा रजोवहति तदा चाण्डाली भवति । तस्मिन्नेव च ऋतुकाले स्त्रीणाम् ऊर्द्ध्वनाडी डोम्बीभवति । अत्र समयथाऽपि स्त्रियोऽस्पृश्या पुरुषस्य तु काले शुक्रा-गमनकाले सैव डोम्बी अवधूती स्यात् ।

The other work is professedly a commentary. Here is an extract from leaf 4 A : -

तां हस्ते गृहीत्वा तद्योगेन स्वदेवतायोगेन वा एवं मन्त्रं लक्षं जपेत् । पश्चात् तां शिखायां वद्ध्वा दूरोदरं द्यूतक्रीडां प्रतिभुञ्जानः भवति इत्यर्थः । केशा(शा)ज्ज्वलामास्त्र-शायिनी । नराणाम् चरममवसानम् तस्यैव श्लोकस्य चतुर्थपादान्ताक्षरम् अस्यायं मन्त्रः ॐ गः स्वाहा । अमरनिर्ज्जीवन्ति ये प्रणवेन स्वाहयाऽसंपुटितम् । जप्तं महामायूर्य्या हृदयमिदं सर्व्वकर्म्मकरं । मन्त्रः ॐ अमरनिर्जीवान्तये स्वाहा । स च मन्त्रराजः सुजप्तः सर्व्वकर्म्मकरः । निर्गुण्डिपिचुमर्द्दमलं शिखिपुच्छमेकतः संयोज्य तेन मन्त्रेण अष्टशतजपेन सर्व्वज्वरेषु धूपोदयः । ते सर्व्वे अपगच्छन्ति ।

It has a colophon कल्याणकामधेनुविवरणं समाप्तम् ।

Post Colophon. सम्वत् २२४ वैशाखशुक्ले पुस्तकमिदं लिखितमिति ॥

So the latter MS. is copied in 1104 A.D.

DR. RUPNATHJI(DR. RUPAK NATH)

III. 363 C. योगाम्बरकल्पसाधनम् । $11\frac{1}{2} \times 2$ inches Folia 36, pierced by a hole towards the left. Lines, 5 on a page Extent in slokas, 550. Character, Newári. Date ? Prose. Incorrect.

It begins

ओं नमः ज्ञानडाकिन्यै ।
सत्स्वभावमलातीतां सहजानन्दरूपिणीं ।
महासुखरतां देवीं वन्देऽहं मोक्षदायिनीम् ॥
श्रीमदुज्ञानेश्वरीं नत्वाप्रज्ञोपायात्मिकां पराम् ।
तत्साधनमहं वच्मि मूलतन्त्रानुसारतः ॥

Colophon. आर्य्ययोगाम्बरभट्टारकस्य कल्पसाधनं समाप्तम् ॥

The same pagination is not continued throughout the work, though the work is one and the same The parts all relate to the secret worship of Yogámbara. On the top of a hill just behind the Residency there is a temple of Yógāmbara who is greatly worshipped at the present day.

III. 363 D. नागानन्द नाटक । $11 \times 2$ inches. Folia, 32 (first 3 leaves missing) pierced by a hole towards the left. Lines, 8 on a page. Extent in slokas, 1000. Character, Bengali. Date—N.S. 313=1193 (the year of the Mahomedan conquest of Delhi). Prose and Verse. Appearance, old. Incorrect.

Post Colophon सम्वत् ३१३ कार्त्तिककृष्ण आदीतवारे राजाधिराजपरमेश्वर श्रीलक्ष्मीकामदेवस्य विजयराज्ये × × × समाप्तमिति ।

Then in a different and later hand

स्वस्ति श्रीललितपत्तनात् शुभ × × × ।

III. 363 E. गीतगोपालः by चतुर्भुज । $12\frac{1}{2} \times 2$ inches. Folia 23, pierced through the centre. Lines, 5 and 6 on a page. Extent in slokas, 700. Character, Bengali. Date La. Saṃ. 499. Appearance, old. Verse. Incorrect.

The first leaf has peeled off in so many places, that it is difficult to read it.

The author is Caturbhuja, and his patron Siṃhadalan Rāya. The author's father obtained the title of Paṇḍit Rāj at the court of Akbar by defeating in argument Paṇḍits assembled in his court held at Medinīgarḍa. His patron obtained from Jahangir, the son of Akbar, the title of Siṃhadalana. Two more names have been given, that of Anūp Rāy and Vīr Nārāyana, who appear to be his ancestors. It is written in imitation of

DR. RUPNATHJI( DR. RUPAK NATH )

Gita Govinda of Jayadeva. It is complete in 13 chapters. The post-Colophon statement runs thus :—

समाप्तश्चायं लसं ४९९ जेष्ठ्र कृष्णाष्टम्यां सिमरामग्राम × × × ।

This was copied at Simraon in A.D. 1611.

III. 363 F. गणेशस्तवराजः । 12×2 inches. Folia, 14 (first leaf missing), pierced by a hole towards the left of the centre. Lines, 4 on a page. Extent in slokas, 125. Character, Newári. Date—N.S. 513=1393 A.D. Appearance, old. Verse. Incorrect.

Colophon इति भविष्यपुराणे चतुर्थीकल्पे सप्तांशे अष्टपोदशाध्यायः स्तवराजः समाप्तः । श्रेयोऽस्तु सम्वत् ५१३ भाद्रपदशुक्लमङ्गल चतुर्थीप्रपञ्चम्यां सातिथौ चित्रनक्षत्रे शुद्धियोगे मङ्गलदिने शुभमस्तु सर्व्वजगताम् । यदि शुद्धमशुद्धं वा मम दोष न दीयते ॥

III. 363 G. 11½×2 inches. Folia 36, pierced by a hole towards the left from the centre. Lines, 5 on a page. Extent in slokas, 550. Character, Newári. Date ? Appearance, old. Prose. Incorrect.

It is a fragment of a large work in Vajrayána. The initiated asks his doubts to his preceptor.

In leaf marked 49 A परमार्थसत्यामेलायकसंशयपरिच्छेद सप्तमः समाप्तः ।

In leaf 55 श्रेधातुकाभिषेकेन शिष्यकृतनताञ्जलि ।
अनुज्ञातश्च तत्तस्य पदं धातुप्रचोदितः ॥
मालासलिलसम्बुध्य वज्रघण्टाय दर्पणम् ।
नामाचार्य्यमनुज्ञान अभिषेकक्रमोत्तयम् ॥
ततः समर्पयेत् तस्य वाह्यातिसंबोधिलक्षणम् ।
सम्प्रदायपदावाप्तम् गुरुपर्व्वक्रमागतम् ॥ इति ।

69 B. निष्पञ्चरामेलावनसंशयपरिच्छेदः दशमः ।
अप्रतिष्ठितनिर्व्वाणधातुमेलावनसंशयपरिच्छेद अष्टमः ।

From the colophon the Librarian has named the work Samsaya pariçheda.

III.363 H. वेणीसंहारनाटकम् । 12×2 inches. Folia 61, pierced by a hole towards the left. Lines, 5 and 6 on a page. Extent in slokas, 1000. Date ? Character, Newari. Appearance, old. Prose and verse. The MS. is worn out in the end.

DR.RUPNATHJI(DR.RUPAK NATH)

III. 363 I. आदिकर्म्मविधिः । 13×2 inches. Folia 29 (8 leaves missing, a work running over 37 leaves), pierced by a hole towards the left. Lines, 6 on a page. Extent in slokas, 700. Character, Bengali. Date? Appearance, fresh. Prose and Verse. Correct.

Colophon. इत्यादिकर्म्मविधिः ।

दिशति शुभाकरगुप्तः सन्मार्गं जगति जातकारुण्यः ।
परमततिमिरनिराकृतिवीरः कोऽप्येष नरमिहिरः ॥
ततकरगुप्तेन कृता लोकद्वयसकलसुगतिसुखदात्री ।
प्रज्ञाकरगुप्तचिरप्रणयवशात् आदिकर्म्मकृतिरचना ॥

निर्जिन ।

Here the MS. ends. Apparently there were some more verses.

This is a work written by a Bengali Vaidya at the request of another Bengali Vaidya, on the initiation into Budhism. The MS. is copied in Bengali character. The palm leaves, on which it is written, do not appear to be so well-seasoned as the palm leaves of ancient Newári MSS. In the leaves before us, there is not much of the secret worship; so the Bengal form of Budhism seems to have been much purer than the Budhism of Nepal.

III. 363 J. देवप्रतिमालक्षणम् । 11×2 inches. Folia 102, pierced by a hole towards the left of the centre. Lines, 6 on a page. Extent in slokas, 200. Character, old Newári. Date? Appearance, old. Prose. Correct.

It begins. नमो बुद्धाय ।

बुद्धो भगवान् जेतवने विचरति स्म । तुषितवरभवनात् सान्तर्धाना-देशममवगत—कालसमये शारिपुत्रो भगवन्तमेतदेवोचत् । भगवन् भगवता गते परिनिर्वृते वा श्राद्धैः कुलपुत्रैः कथं प्रतिपत्तव्यम् । भगवानाह शारिपुत्र मयि गते परिनिर्वृते वा न्यग्रोधपरिमण्डलं कायं कर्त्तव्यम् । यावद्व कायं तावत् व्यामं । यावद्व व्यामं तावत् कायम् । पूजासंस्कारार्थं प्रतिमा कर्त्तव्या । सर्व्वाङ्गोपाङ्गावयवस्योल्ललावण्य-लालित्यसलिलतत्त्वम् छत्राकारशिरःकम्बांशस्थितोष्णीषेत्यादिसुसंस्था-नात् । तत्र ग्रन्थायामविस्तारोच्छेदसन्निबन्धनिर्गमैः प्रमाणं बोधि-सत्त्वानां सुगतानाञ्च प्रवक्ष्यामि । तच्छृणु । तत्र तावत् प्रमाणं बोधिसत्त्वानां स्वेन अङ्गुलिप्रमाणेन शतं विंशत्योत्तरम् । बुद्धानाम् पञ्चविंशत्योत्तरं ।



DR. RUPNATHJI( DR. RUPAK NATH )

चतुरङ्गुलमुष्णीषं केशस्थानं ततोऽद्वयम् ।
साद्धींऽत्रयोदशीमात्रं मुखं भागवतं नृपम् ॥
ललाटं नासिकाञ्चाधः चिबुकान्तं तृतीयकम् ।
चतुरङ्गुलललाटान्तु तुल्यनासिकाया भवेत् ।
स्वाधिकं चिबुकान्तन्तु चिबुकं द्व्यङ्गुलं भवेत् ॥
आयामनिर्गमाच्चैव चतुरङ्गुलमिष्यति ।
चतुरङ्गुलौ कपोलौ तु कर्णमूलात् विनिःसृतौ ।
हनुः स्यात् त्र्यङ्गुलोच्छेदो विस्तारे द्व्यङ्गुलस्तथा ॥
स्वाधिकः परिपूर्णः स्यात् महासिंहहनुर्यथा ।
अधरो द्व्यङ्गुलायामो निर्गमोच्छेदमात्रकः ॥

III. 364 A. बुद्धचरित्रकाव्य by अश्वघोष। $11\frac{1}{2} \times 2$ inches. Folia 55, 1, 2, 7, 8 leaves are missing, pierced through by a hole towards the left. Date? Character very ancient, when Bengali and Newári were mixed together. Appearance, old. Verse. Correct.

The MS. ends at the middle of the 14th canto. This MS. was not consulted by Amṛtānanda in preparing copies of the work for Europe. Cowell has edited the Buddhacarita in the Anecdota Oxoniansia series. The present MS. begins with the 3rd leaf and with the 46th śloka of Cowell. Each page consists of $8\frac{1}{2}$ couplets. Accordingly the 3 pages missing would have had 25 couplets. For these 25 Amṛtānanda substituted 45 of his own composition. The 45th verse of Cowell ends with the words विराजितश्चोभयपार्श्वतस्तत् । But in our MS. we have श्रेवत्रमो निरोधः । This is not found anywhere in Cowell.

In the 9th book of Cowell the lecuna commencing at 41st verse is thus supplied by this MS.

पादकुलं चास्थि ( रमारविन्दमु-
राज्यं हि रम्यं व्यसनाश्रयञ्च ॥
यत्तस्य राज्यं न सुखं न धर्म्मं पूर्व्वं तथा जातघृणा नरेन्द्राः ।
वयःप्रकर्षेऽपरिहार्य्यदुःखे राज्यानि मुक्त्वा वनमेव जग्मुः ॥
चिरं हि भुक्तानि तृणान्यरण्ये त्रियंकरो (?) रत्नमिवोपगुप्तः ।
सहोषितं भौमुलभेनचैव दोषैरदृश्यैरिव कृष्णसर्पैः ॥
स्थाप्यं हि राज्यानि विहाय राज्ञाम् धर्म्माभिलाषेण वनं प्रवेष्टुम्
भग्नप्रतिज्ञस्य ननूपपन्नम् वनं परित्यज्य गृहं प्रवेष्टुम् ॥
जातः कुले को हि नरः ससत्त्वो धर्म्माभिलाषेण वनं प्रविष्टः ।

DR.RUPNATHJI(DR.RUPAK NATH)

काषायमुत्सृज्य विमुक्तलज्जः पुरन्दरस्यापि पुरं श्रयेत ॥
लोभात् विमोहादथवा भयेन यो वान्तमन्नं पुनराददीत ।
लोभात् स मोहादथवा भयेन संत्यज्य कामान् पुनराददीत ॥
यश्च प्रदीप्ताच्छरणात् कथञ्चित् निष्क्रम्य भूयः प्रविशेत्तदेव ।
गार्हस्थ्यमुत्सृज्य स दृष्टदोषो मोहेन भूयोऽभिलषेत् ग्रहीतुम् ॥
वह्नेश्च तोयस्य च नास्ति सन्धिः शठस्य सत्यस्य च नास्ति सन्धिः ।
आर्य्यस्य पापस्य च नास्ति सन्धिः सामस्य (?) दण्डस्य च नास्ति सन्धिः ॥
यां च श्रुतिः मोक्षमवाप्तवन्तो नृपा गृहस्था इति नैतदस्ति ।
शमप्रधानः क्व च मोक्षधर्म्मः दण्डप्रधानः क्व च राजधर्म्मः ॥
• शमे रतिश्चेत् शिथिलञ्च राज्यं राज्ये मतिश्चेत् शमविप्लवश्च ।
शमश्च तैक्ष्ण्यञ्च हि नोपपन्नम् शीतोष्णयोरैक्यमिवोदकाग्न्योः ॥
तन्निश्चयात् वा वसुधाधिपास्ते राज्यानि मुक्त्वा शममाप्तवन्तः ।
राज्याङ्किता वा निभृतेन्द्रियत्वात् अनैष्ठिके मोक्षकृताभिमानाः ॥
तेषाञ्च राज्येऽस्तु शमो यथावत् प्राप्तो वनं नोऽहमनिश्चयेन ।
छित्त्वा हि पाशं गृहबन्धुसञ्ज्ञं मुक्तः पुन र्न प्रविविक्षुरस्मि ॥

Though the Chinese Translation speaks of 16 verses here, our MS. has only eleven.

III. 364 B. अन्तर्व्याप्तिसमर्थन by रत्नाकरशान्ति । $11\frac{1}{3} \times 2$ inches. Folia 6, pierced by a hole towards the left. Lines, 7 on a page. Extent in slokas, 140. Date? Character, Newári and Gupta mixed. Appearance, old. Prose. Correct.

It begins ॐ नमो बुद्धाय ।
इह सत्त्वम् अर्थक्रियाकारित्वम् । तदितरसत्त्वे लक्षणायोगात् ।
तच्च क्रमयौगपद्याभ्याम् व्याप्तम् ।
परस्परव्यवच्छेदलक्षणत्वादनयोः ॥

Colophon. अन्तर्व्याप्तिसमर्थनम् समाप्तमिति । कृतिरियं रत्नाकरशान्तिपादानाम् ।

III. 364 C. पाकविधिः by श्रीदिवाकरचन्द्र । $11 \times 2$ inches. Folia 17, pierced by a hole towards the left. Lines, 8 on a page. Extent in slokas, 500. Date? Character, Newári in an uniformly slanting hand. Appearance, old. Black with age. Prose. Incorrect.

It begins ॐ नमो आर्य्यावलोकितेश्वराय ।
प्रणिपत्य लोकनाथं लोकोत्तरविराजमुखकमलम् ।
नानाव्याध्युपशमनं पाकविधिं संप्रवक्ष्यामि वक्ष्ये ॥

DR. RUPNATHJI( DR. RUPAK NATH )

Colophons. इति गुड़पाकविधिः। ... मधुपाकविधिः। ... काश्मरीपाकविधिः। ... आमलकीपाकविधिः। ... शाल्मपाकविधिः। ... घृतपाकविधिः। ... तैलपाकविधिः। .... यमकस्नेहपाकविधिः। ... त्रिवृतस्नेहपाकविधिः। महास्नेहपाकविधिः। ... क्षीरपाकविधिः। ... विलेपीपाकविधिः। ... मुद्गान्नपाकविधिः। ... यवागुपाकविधिः। ... युषपाकविधि ... स्तूपरसपाकविधिः। ... रसोनपाकविधिः। ... भल्लातकपाकविधिः। ... कुष्माण्डपाकविधिः। समाप्तोऽयं पाकविधिर्नाम अनेकरोगप्रशमनः। कृतिरियम् पण्डितदिवाकरचन्द्रस्य इति।

Post Col. लिखितमिदं श्रीराघवजीवेन स्वपरार्थहेतोः।

There is one prescription after this in a separate leaf, which ends with the words समाप्तः पाकविधिः॥

III. 364 D. योगरत्नमाला or हेवज्रपञ्जिका। 11½×2 inches. Folia 38, of which 1, 2, 6, 7, 8, 16, 17, 22, 26, 27, 33, 35, 36, 37 leaves are missing. Lines, 6 on a page. Extent in slokas, 500 (calculated without the missing leaves). Date? Character, Transitional Gupta. Appearance, old. Prose and Verse. Correct.

Colophons :—

Leaf 9 A. इति योगरत्नमालायां हेवज्रपञ्जिकायां प्रथमः पटलः।

10 B. „ „ मन्त्रपटलः द्वितीयः।

13 A. „ „ चतुर्थः पटलः।

14 B. „ „ तत्त्वपटलः पञ्चमः।

18 B. „ „ अष्टमः पटलः।

21 B. „ „ क्षोम्मापीठनिर्णयपटलः सप्त।

It is difficult to find why the paṭalas are so differently arranged in the ṭikā, while they are arranged in their proper order in the text, which is to be found in a paper MS. No. 249. But the text is divided into two parts, each subdivided into 11 paṭalas. The anomaly may be explained by the loss of leaves in the ṭikā as well as by the same number being used in both the parts. The 1st leaf of this MS. is missing, but the 1st leaf of another in the same character has been put in as the first leaf of this MS. It begins :—

ॐ नमः कालचक्राय।

सुचन्द्र आह। सेकः सप्तविधः शास्तुर्ज्ञानविधानुत्तरस्तथा।
लौकिकोत्तरसिद्ध्यर्थं संक्षेपात् कथयस्व मे॥

DR.RUPNATHJI(DR.RUPAK NATH)

भगवानाह । शृणु सुचन्द्र सेकार्थं सप्तत्रिविधं परम् ।
नाडीसञ्चारमायामम् उद्देशात् कथयामि ते ॥
उद्देशस्त्रिविधस्तन्त्रः निर्देशस्त्रिविधो भवेत् ।
प्रत्युद्देश महोद्देश प्रतिनिर्देशको परः ॥
उद्देश एव निर्देशः तन्त्रसंगीतिरुच्यते ।
प्रत्युद्देशस्य निर्देशः पञ्जिकापदभञ्जिका ॥
महोद्देशस्य निर्देशः टीका सर्व्वार्थसूचिका ।
अभिज्ञालाभेभिः शुद्धं लोकधात्वान्वितैर्मतैः ॥
सत्याभ्यासादि शुद्ध स्यात् कालचक्राभेदानकम् ।
आदौ सप्ताभिषेको यो बालानामवतारणम् ॥
त्रिविधोलोकसम्वृत्त्या चतुर्थः परमार्थतः ।
सत्यद्वयेन धर्म्माणाम् देशनावज्रिनो मम ॥
लोकसंवृतिसत्येन सत्येन परमार्थतः ।
उदकमुकुटपट्टो वज्रघण्टा महाव्रतम् ॥
नानानुज्ञासमायुक्तः सेकः सप्तविधो नृप ।
कायवाक्चित्तसंशुद्धिरभिषेकद्वयं स्मृतम् ॥
The following are the names of the Ragas given in the 2nd chapter –

श्रीहाटी ललिता गौड़ी विख्यात गमकोभटाः

— — — — —

श्रीरागस्तिलकोदेव गुप्तः पञ्चमषाड़भः ॥
कोकिला पञ्चलघुका (?) शकादिः सैन्धवस्तथा ॥
गान्धारः पञ्चमी रागे रागोमध्यम षाड़भः ।
भवना पञ्चमोभाषो भैरवो नउ एवच ।
ध्वनिप्रमोक्ता × × रक्तहंसाख्यपञ्चमा ।
कल्पो मेघरागश्च तथा ककुभकौशिकः ॥
देशाख्यः सोमरागश्च नौ (नरो)नारायणस्तथा ।
द्वौ द्वौ कामोदवङ्गालौ त्रिंशदित्युपरागकाः ॥
सौविर उरक हिन्दोल ककुभा भिन्न पञ्चमः ।
गान्धारी पञ्चमस्तालः तथा वेशर (?) षाड़भः ॥
पञ्चमो भिन्न षड्जश्च भोटमालवपञ्चमौ ॥
कौशिकान्तौ तथा . . . . . . षाड़भान्ततः ॥



DR.RUPNATHJI(DR.RUPAK NATH)

+ + + + +

षाधारिता च शोरिरी, गान्धारी षेगमध्यमाः ।

+ + + + +

वैरञ्जी वेगरञ्जी च सौराष्ट्री पञ्चमी तथा
गान्धारपञ्चमी कोला हला मालववेशरी ॥
मध्यमग्रामदेहा च छेवाटी सैन्धवी तथा ॥
वेशरी छेरिकादेशा माधवीषचिवाठिका ॥
तालक्षातालवनिता तथा पञ्चमलक्षिता ॥
ललिता गेसटर्कें स्यु भाषाणामेकविंशतिः ॥
चतस्रः स्युर्विभाषास्तु भावनी गुर्ज्जरी तथा ।
देवावर्द्धिनी वान्ध्री पिञ्जरी चूतमञ्जरी ॥

× × × ×

भाषा हिल्लोलगा —

भिन्न पञ्चमी मधुरी तथा ।
रगन्ती मध्यमा ग्रामा काम्बोजी शकमिश्रिता ॥
ककुभे वडधूर्भाषा विभाषा भोगवर्द्धिनी ।
आभीरिका मधुकरी त्रिश्रोषान्तरभाषिका ॥
शालवाहनी केकैव चतस्रो भिन्नपञ्चमे ।
शुद्धा भिन्ना च वाराटी भाषातत्त्वविशारिणी ॥
कौशल्येका विभाषापि भाषा गान्धारपञ्चमे ।

+ + + +

तालोद्भवा गुर्ज्जरी च सौराष्ट्री कौशिकी तथा ।
आभीरी द्राविणी तालोद्भवान्ध्री सैन्धवी तथा ॥
दाक्षिणात्येतु भाषाः स्युः पञ्चमे दश भाषिता ।

+ + + + ॥

द्रविणा दाक्षिणात्या च कालिन्दी च पुलिन्दिका ।
वाङ्गाली ललिता श्रीकण्ठिका तद्गुम्निषादिनी ॥

III. 379. मतसार । $12\frac{1}{2} \times 2$ inches. Folia 161, pierced by a hole towards the left. Lines, 5 on a page. Extent in ślokas, 2400. Date ? Character, Newári. Appearance, old. Verse. Correct.

The last Colophon runs

इति लक्षपादाधिके महासंहितायां द्वादशसाहस्रे विद्यापीठे मतसारे त्रयोविंशतिमः पटलः ॥

DR.RUPNATHJI( DR.RUPAK NATH )

The MS. begins as usual with Tántrika works, with the description of Kailása. The work entitled Matasára at p. 222 of my Nepal Catalogue seems to be an abstract of this. This work belongs to the western school of Tantras.

III. 380 A. वामकेश्वरटिप्पनम् । $13 \times 2\frac{1}{2}$ inches. Folia, 49 pierced by a hole towards the left. Lines, 5 on a page Extent in ślokas, 1000. Character, old Newári. Appearance, old. Date? Prose and Verse. Incorrect.

Begins. ॐ नमः शिवादिभ्यः गुरुभ्यः ।

जयति जितसुधाम्भःसम्भवद्वाग्भवश्रीः
रससरससमुद्यत्कामतत्त्वानुभावा ।
तदनुपरमधामध्यानसंलक्ष्यमाना
रवि-शशि-शिखिरूपा त्रैपुरीमन्त्रशक्तिः ॥

श्रीवामकेश्वरीमते × स्मरणार्थं विषमपदेषु टिप्पणकं लिख्यते ।
देवीशिष्यः प्रशिष्यो वाञ्छञ्छ(?)मवतारयिषु ।
नमस्कारान् करोति गणेशग्रहनक्षत्रेत्यादिः ॥

इति वामकेश्वरे महातन्त्रे त्रिपुराहोमविधिर्नाम पञ्चमः पटलः समाप्तः ।

III. 380 B. ब्रह्मसंहिता । $12 \times 2$ inches. Folia, 87 (but the leaves 38, 49, 60 are missing), pierced by a hole towards the left. Lines 5 on a page. Extent in ślokas, 1200. Character, old Newári. Date N.S. 315 = 1195 A.D. Appearance old. Verse. Correct.

Begins :— विश्वेश्वरं विश्वसृजं वरेण्यम्
विश्वं विशुद्धं वरदं वरिष्ठम् ।
अनादिमरूपमलक्ष्यरूपं
विष्णुं विभुं विप्रजितम् नतोऽस्मि ॥

उत्पत्तिस्थितिसंहारबन्धमोक्षैककारणम् ।
नारायणमनिर्यात्तम् (?) प्रणतोऽस्मि जगद्गुरुम् ॥
सुमेरोर्दक्षिणमूर्ध्नि सहस्रांशुसमप्रभे ।
वज्रेन्द्रनीलरचितं पद्महंसोपशोभिते ॥
मुक्तामलशिलाशङ्खचन्द्रांशुसमप्रभे ।
— — — — ॥
— — — — ।

DR.RUPNATHJI( DR.RUPAK NATH )

आश्रमम् मुनिमुख्यस्य मार्कण्डेयस्य धीमतः ॥
तस्मिन् महाश्रमे दिव्ये समासीनं शुचिव्रतम् ।
महौजसं महाभोगं मुमुक्षुं मुनिपुङ्गवम् ॥
— — — — ।
कपिञ्जलोऽञ्जलिं कृत्वा प्रश्नमेतत् अपृच्छतम् ॥
कपिञ्जल उवाच ।
श्रुतं मया मुनिश्रेष्ठ मानोऽपैव जनार्द्दनात् ।
ध्यातोऽथवार्च्चितो नृणां मुक्तिदो भवबन्धनात् ।
— — — — ।
— — — — ॥
यत्नैर्वा तुष्यते देवो वेदोक्तैर्वा महात्मभिः ।
तीर्थसेवाकृतो सम्यक् पूजावाक्यैरिता (?) ॥
ध्यानयोगफलं तस्य क्रियायोगफलञ्च यत् ।
विष्णोराराधनायालं वद मे वदताम्वर ॥

Colophon. इति ब्रह्मोक्तसंहितायां ब्रह्मनारदसंवादे विष्णुरहस्ये प्रतिष्ठाधिकार नाम अध्यायः समाप्तः ।

Other Colophons. 13 B. इति विष्णुप्रोक्तसंहितायां विष्णुरहस्ये मार्कण्डेयनारदसंवादे क्रियायोगावतारोऽध्यायः प्रथमः ।

16 A. इति ब्रह्मप्रोक्तसंहितायां विष्णुरहस्ये शारीरव्रतकथनोध्यायः द्वितीयः ।
21 B. इति ब्रह्मप्रोक्तसंहितायां विष्णुरहस्ये नवव्यूहावतारनामाध्यायः तृतीयः ।
26 A. इति ,, ,, पुष्पविधिनिर्णय नाम अध्यायः ।
28 A. इति ,, ,, चातुर्मास्य व्रतविधानानि ।
35 A. इति ,, ,, ब्रह्मनारदसंवादे पवित्रारोहणं नाम अध्यायः ।
37 A. इति ,, ,, जयन्ताष्टमीव्रतं नाम अध्यायः ।
37 B. इति ,, ,, युगावतारव्रतं नाम ।
Do. ,, ,, ,, श्रवणद्वादशीव्रतं नाम ।
40 A. इति ,, ,, अनन्तद्वादशीव्रतं नाम ।
40 B. ,, ,, ,, कौमुदव्रतकथा ।
42 A. ,, ,, ,, कार्त्तिकव्रतकथा ।
48 A. ,, ,, ,, मासोपवासव्रतकथा ।
50. ,, ,, ,, भीष्मपञ्चककथाव्रतम् ।

DR.RUPNATHJI( DR.RUPAK NATH )

62 A. ब्रह्मप्रोक्तसंहितायां विष्णुरहस्ये यमपुरीमार्गयमदूतनरकयातनास्वरूप-वर्णनं नाम अध्यायः ।

66. Colophon effaced.

| | | | | |
|---|---|---|---|---|
| 79. | ,, | ,, | ,, | स्वनामद्वादशीव्रतकल्पः । |
| 71 B. | ,, | ,, | ,, | नरककल्पनाम अध्याय । |
| 73 B. | ,, | ,, | ,, | अत्रिविक्रमव्रतम् । |
| 74 A. | ,, | ,, | ,, | महाफलद्वादशीव्रतम् । |
| 75 A. | ,, | ,, | ,, | संप्राप्तद्वादशीव्रतम् । |
| 76 A. | ,, | ,, | ,, | गोविन्दद्वादशीव्रतकल्पः । |
| 78 A. | ,, | ,, | ,, | विष्णुव्रतकल्पः । |
| 79 A. | ,, | ,, | ,, | पापप्रशमनीव्रतकल्पः । |
| 81 A. | ,, | ,, | ,, | प्रासादलक्षणगुणानुकीर्त्तनं नाम । |
| 85 A. | ,, | ,, | ,, | प्रतिमालक्षणं नाम । |

Post Colophon Statement. संवत् ३१५ चैत्रशुक्लपूर्णमास्यां सोमवासरे चित्रानक्षत्रे हर्षणयोगे राजाधिराजपरमभट्टारकश्रीविजयकामदेवस्य विजयराज्ये विप्रश्रीजयब्रह्मशर्मणः लिखितमिदं पुस्तकम् ।

III. 380 C. In this MS. there are several small treatises written in different hands and at different periods of times. The treatises are generally liturgical and manuals of priests. The first is a treatise in 18 leaves on the ten Brahmanic sacraments. The second in 10 leaves describes the process of worshipping and offering ghee to Amṛtiṣa.

There is a leaf in 9th century character giving वायमते कीलकारोपण मन्त्रः ।

There is one leaf on Siddhi Vináyaka Dharma. Another treatise beginning with the 2nd and ending on the 15th leaf, gives Vija-Mantras.

There is another MS. in 56 leaves written in a bad scribbling hand, which is a priest's manual. It has no end. In the beginning occurs the following:

श्रीनाथस्मरण तेन गर्ज्जयति महामोहतिमिरहरण श्रीकृतविबुधवृन्दहृदयाम्भोरुहवनबोधान्तुष्टेन (?) ।

III. 381. अष्टसाहस्रिका प्रज्ञापारमिता । 21 × $2\frac{1}{2}$ inches. Folia, 200 pierced by two holes. Lines, 6 on a page. Extent in ślokas, 8000. Date ? Character, Newári Ranjā. Appearance, fresh. Verse. Correct.

DR.RUPNATHJI(DR.RUPAK NATH)

The MS. is profusely and beautifully illustrated at the first and last pages. Some leaves were lost which have been replaced by writings on paper cut in the shape of palm-leaves.

Post Col.—After the usual Buddhist formula of faith, it runs thus :—

श्रीश्रीकण्वकुब्जाधिपत्यश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचार-वाचस्पतिश्रीमद्गोविन्दचन्द्रदेवस्य प्रतापवशतः राज्ञी श्रीप्रवरमहायानयायिन्याः परमोपासिका राज्ञी श्रीवासन्तदेव्या देयोधर्मोऽयं यदत्र पुण्यं तद्भवतु आचार्योपाध्यायमातापितृ etc.

This was a gift of the wife of Govinda Candra, King of Kanauj, who reigned about the middle of the 12th century, A.D. Govinda Candra was a staunch Hindu. It was under his patronage that Lakṣmīdhara compiled a great work on Smṛti in seven parts. But one of his wives apparently was a Buddhist. It is now known from an inscription at Sārnāth deciphered by the Government Epigraphist, Dr. Sten Konow, that the king had another Buddhist wife, the grand-daughter of Pīthipati, who helped Rāmapāla in quelling the Kaivarta rebellion in Northern Bengal. The marriages of Hindu Kings with Buddhist Queens seem to have been common.

III. 382 A. योगशतक by नागार्ज्जुन। 12×2 inches. Folia, 28 pierced by a hole towards the left. Lines, 5 on a page. Ślokas, 500. Date N.S. 452=1332 A.D. Character, Newári. Appearance, old. Prose and Verse. Correct.

Post Col. सम्वत् ४५२ माघकृष्णाद्वादश्यां तिथौ लिखित श्रीजीवदेवलिखित-मिति।

The verses are generally accompanied with a commentary by Paṇḍita Dhruvapáda. The commentary is entitled Candrakalá.

The following statement is made in leaf 28. सुश्रुतादिसंहितायामुत्तर-तन्त्रदर्शनात्। प्रयोगयष्टिमायुर्वेदकथन कृतमिति। संहतत्वे मन्यमानोऽकृत्यमानमुत्तर-तन्त्रमनेन श्लोकेन सूचितवानिति॥

III. 382 B. पञ्चरक्षा। $21\frac{1}{2} \times 2$ inches. Folia, 91 pierced by two holes. Lines, 5 on a page. Date N.S. 507=1387 A.D. Character, Newári. Appearance, old. Prose and Verse. Incorrect.

Post Colophon Statement. After the usual Buddhist article of faith. श्रेयोऽस्तु सम्वत् ५०७ कार्त्तिकशुक्लप्रतिपद्यायां तिथौ बुद्धवासरे वैशाख

DR. RUPNATHJI( DR. RUPAK NATH )

नक्षत्रे शोभनयोगे नेपालमण्डलह्निराज्ये श्रीजयस्थितिराजमल्लदेवस्य विजय विजयराज्ये घपेक्षेठकाख्यौ विक्रुनिष्कयां गृहनामख्यनयः श्रं दानपतेर्नायकः खेषामनकस्य ।

There are some illustrations on the boards and one only on the palm-leaves.

III. 383 A. क्रमदीपिका । by केशवाचार्य्य 12½ × 2½ inches. Folia, 19 pierced by a hole towards the left. Lines, 9 on a page. Ślokas, 1,000. Date N.S. 676, 1556 A.D. Character, Newári. Appearance, fresh. Verse. Incorrect.

It begins :—

कला तु मायालवकान्तमूर्त्तिः ।
कलत्क्वणत्वेणु निनादरम्यः ॥
श्रितो हृदि व्याकुलयन् त्रिलोकीं ।
श्रियोस्तु गोपीजनवल्लभो वः ॥
गुरुचरणसरोरुहद्वयोत्थानमहीतरजःकणान् प्रणम्य मूर्ध्ना ।
गदितमिह नारदाद्यैः यजनविधिं कथयामि शार्ङ्गपाणेः ॥
क्षितिसुरनृपविट्तुरीयजानां मुनिवनवासिगृहस्थवर्णिनाञ्च ।
जयकृते यजनादिभिः मनूनां भवति हि कश्चन कस्यचित् कथञ्चित् ॥

It ends :—

संशयतिमिराच्छन्नवासेषा क्रमदीपिकाकरेण महद्भिः ।
करदीपिकेव धार्य्या सद्भिरहर्निशं समस्तसुखावाप्त्यै ॥
जगदिदमनुविद्धं येन यस्मिन् प्रसूते ।
यदनु ततमजस्रं याति याधिष्ठितोयं ॥
यदुरु महदुदर्कं यं विधत्ते च गोपी ।
तममृतसुखरूपं ज्योतिषं नौमि कृष्णम् ॥
यश्चक्रं निजकेलिसाधनमधिष्ठानस्थितोयं प्रभुः ।
दत्तं मन्मथशत्रुणा वलकृते व्यावृत्तलोकातिकं ॥
धत्ते शीघ्रनखेन्दुभासममघोपेतान्तमायं ध्रुवम् (?)
वन्दे कायविमर्द्दनम् वधकृतां भुक्तं (त्युक्तं) यादवम् ॥
इति श्रीकेशवाचार्य्यविरचिता क्रमदीपिका समाप्ता
सम्वत् ६७६ आषाढशुक्लप्रतिपत् करणवंशोद्भवः श्रीभावसिंहात्मज श्रीविष्णुसिंहेन स्वार्थं लिखितम् ॥

The MS. is full of marginal notes of a very valuable kind, and with rubrics to indicate the beginnings of ślokas and also of topics. It is divided into Patals.

DR.RUPNATHJI( DR.RUPAK NATH )

III. 383 B. कुब्जिकापूजापद्धतिः ॥ $11\frac{1}{2} \times 2$ inches. Folia, 153 pierced by a hole towards the left. Lines, 5 and 6 on a page. Extent in slokas, 2500. Date? Character, Newári. Appearance, old. Prose and Verse. Incorrect.

This is a priest's manual,—a priest of the Kubjikāmata. It contains a number of stotras to Śiva and Śakti. It has a number of Kūṭākṣara Mantras, by joining together a number of consonants with a single vowel (an example, Shklmbrum). The work is unfortunately not complete. This is also a work of the Paścima or western school of Tantra, its votaries being called Kaulas.

The names of the 64 Yoginīs are given as follows: Leaf 51 and 52.

१ श्रीजयादेवी, २ विजया, ३ जयन्ती, ४ अपराजिता, ५ नन्दा, ६ भद्रा, ७ भीमा, ८ दिव्ययोगी, ९ महासिद्धयोगी, १० गणेश्वरी, ११ शाकिनी, १२ कालरात्री, १३ ऊर्द्ध्वकेशी, १४ निशाकरी, १५ गम्भीरा, १६ भूषणी, १७ स्थूलाङ्गी, १८ पवगी, १९ कल्लोला, २० विमला, २१ महानन्दा, २२ ज्वालामुखी, २३ विद्या, २४ पक्षणी, २५ विषभक्षणी, २७ महासिद्धिप्रदा, २८ तुष्टिदा, २९ इच्छासिद्धि ३० कुवर्णिका, ३१ भासुरा, ३२ भीमाक्षी, ३३ दीर्घाङ्गा, ३४ कलहप्रिया, ३५ त्रिपुरान्तकी, ३६ राक्षसी, ३७ घोरा, ३८ रक्ताक्षी, ३९ विश्वरूपा, ४० भयङ्करी, ४१ फेत्कारी, ४२ रौद्री, ४३ वेताली, ४४ शुष्काङ्गा, ४५ नरभोजिनी, ४६ वीरभद्रा, ४७ महाकाली, ४८ कराली, ४९ विकृतानना, ५० कोटराक्षी, ५१ भीमा, ५२ भीमभद्रा, ५३ सुभद्रा, ५४ वायुवेगा, ५५ हयानना, ५६ ब्रह्माणी, ५७ वैष्णवी, ५८ रौद्री ५९ मातङ्गी, ६० चर्च्चिकेश्वरी, ६१ ईश्वरी, ६२ वाराही, ६३ सुवक्री, ६४ अम्बा ॥

एभिर्मन्त्रावरैः देव पदविद्या समर्च्चिता ।
पूजितव्या प्रयत्नेन अष्टाष्टकक्रमागतम् ॥
न देय दुष्टसत्वानां पारम्पर्य्यविवर्ज्जिता ।
आज्ञाशास्त्रविमुक्तानां क्रूरसत्वा न दापयेत् ॥
यद्य दत्तं प्रमादेन ज्ञानकोषन्तु निष्फलम् ।
दातारो नरकं यान्ति यावदिन्द्राश्चतुर्द्दश ॥

इति चतुःषष्ठीभेदक्रमम् । इत्याद्यावतारे चतुर्विंशतिसाहस्रे अष्टलीक्रमद्वयं समाप्तम् ॥

III. 383 C. दौर्गसिंहवृत्तौ परिभाषावृत्तिः । 13 × 2 inches. Folia, 14. Lines, 7 on a page. Extent in slokas, 400. Date N.S. 545 = 1425 A.D. Character, Bengali, with a tendency to Newári. Appearance, old. Prose. Correct.

DR. RUPNATHJI( DR. RUPAK NATH )

It begins :— ओं नमः सर्व्वज्ञाय ।

प्रणम्य सदसद्वादध्वान्तविध्वंसभास्करम् ।
शाङ्नाथं परिभाषार्थं वक्ष्ये बालावबोधये ॥

इहहि: । सूत्रेष्वेव हि तत् सर्व्वं यद्वृत्तौ यच्च वार्त्तिके ।
सूत्रं योनिरिहार्थानां सर्व्वं सूत्रे प्रतिष्ठितम् ॥
येन केनचित् व्याख्यातुकामेन अवश्यमेव अभ्युपगन्तव्यम् । तथा च धात्वर्थः अर्थात् सूत्रयति इति सूत्रं, सूत्र्यति इति वा सूत्रम् । तथा सूत्रकारयोः सर्व्ववर्म्मकात्यायनयोः चतुःशत्यां पञ्चाशदधिकायां परिभाषा नोक्ताः । अथ वृत्तिटीकयोः तत्र तत्र प्रत्युक्ताः । क्वापि च दृश्यन्ते । तासां युक्तितर्कसंसिद्धिरुच्यते । यास्तु शास्त्रीयास्तास्त्रावद्विधा लिङ्गत्येनी (?) विध्यङ्गशेषभूताश्चेति । तत्र लिङ्गविशेषाणामित्येवमादयः । विध्यङ्गशेषभूतास्तु विधीनामङ्गं तत्र शेषः तत्र भवन्तिर्स्मति विध्यङ्गशेषभूता उच्यन्ते । नियमद्वारेण विधिसूत्रैः सह एकवाक्यतामापद्यमाना लाघवोक्तये विध्यङ्गशेषभूताः प्रतिसूत्रमुपतिष्ठन्ते । यथा कर्त्तरि कृत् इत्यादयः । परितः सर्व्वतो भाष्यन्ते अर्था आभिरिति परिभाषाः । ननु तर्हि युक्तितः सिद्धानामपि टीकाकृता तत्र तत्र प्रस्तावात् सयुक्तिकम् प्रयोजनम् उक्तमेव ॥ किं यत्नेन इति ।'

It ends. इति दौर्गसिंहवृत्तौ परिभाषावृत्तिः समाप्ता ॥ श्रीः ॥ श्रेयोऽस्तु । सम्बत् ५४५ आषाढ शुक्लपूर्णमास्यां तिथौ पूर्वफाल्गुनीनक्षत्रे वेधृतियोगे शनिदिने विश्वनाथपतिना लिखितेयम् । यथा दृष्टमिति तथा लिखिता । न दोषो लेखकस्य ॥

This appears to be a commentary on the technical rules of the Kātantra school of Grammar. These technical rules are not to be found in the Sūtras, either of Śarvavarmā or of Kātyāyana. The rules were gleaned from the Vṛtti and the Ṭīká, and this is a commentary on these rules. The author seems to be Buddhist. But his name does not appear in the MS. under notice.

III. 383 D. काव्यालोकलोचन by अभिनवगुप्त । 13×2 inches. Folia, 292 pierced by a hole towards the left. Lines, 5 and 6 on a page. Extent in ślokas, 1,800. Date ? Character, Maithil. Appearance, old. Prose. Correct.

Page 81 B. इति महामात्याभिनवगुप्तविरचिते काव्यालोकलोचने तृतीय उद्योतः ॥

This is a commentary on Ānanda Vardhana's rhetorical work named Sahṛdayahṛdayāvaloka or Kāvyālankāra. The work with its commentary has been published in the Kavyamālā series. The text, already noticed in my Nepal Catalogue No. 400, is copied in La. Saṃ 91. The writing of the commentary seems to be by the same hand.

III. 384. नित्याह्निकतिलक । 12×2 inches. Folia, 90 pierced by a hole towards the left. Lines, 5 on a page. Extent in ślokas, 1300. Date N.S. 573=1453 A.D. Character, Newári. Appearance, old. Prose and Verse. Correct.

The work has already been fully described in my Nepal Catalogue, page 111.

The post colophon statement in this MS. runs thus :—

श्रीमन्नेपालिक श्रेयोऽस्तु सम्वत् ५७३ आषाढ़कृष्णचतुर्दश्यां वृहस्पतिवासरे लिखितमिदं नित्याह्निकतिलकपुस्तकं समाप्तम् । श्रीमु ब्रह्मपुर्य्याधिपतिद्विजकुलोत्तम श्रीद्विजब्रध सोमशर्म्मनोऽर्थे श्रीश्रीजययक्षमल्लस्य विजयराज्ये धातुसिकोष्टवे वाह्नित देवस्य अभयसिंहेन लिखितमिति ।

This MS. was copied during the reign of Yakṣa Malla in the year N.S. 573 by Abhaya Siṃha for Soma Śarmā, a Brahmin, who was lord of Brahmapura, which is a quarter inhabited by Brahmins at Bhátgaṑn.

III. 385. गीताभाष्य by शङ्कराचार्य । 13½×2½ inches. Folia, 133 pierced through the middle. Lines, 9 on a page. Extent in ślokas, 4500. Character, Maithil with first 11 leaves in Newári. Date La. Saṃ 422. Prose. Appearance, fresh. Correct.

From the post col. statement, which has been very nearly effaced, it has been gathered that the MS. was copied under the orders of the Minister of Amaramalla Deva, by Mukunda Pāṭhaka Śarmā at Kāṭhmundu.

III. 386 A. कृत्यमहार्णव । 14½×2 inches. Folia, 178 pierced by a hole at the middle. Lines, 5 on a page. Ślokas, 3500. Date La. Saṃ 433. Character, Maithil. Appearance, old. Prose. Correct.

The work has already been noticed in Dr. Rajendralal's Nos. L. 1000 and 1886. The scribe's name is Śrī Rūpanātha Śarmá.

Post Col. लसं ४३३ चैत्र सुदि प्रतिपदि तिथौ सोमौलिग्रामे लिखितं श्रीरूपनाथ शर्म्मणा ।

DR. RUPNATHJI(DR. RUPAK NATH)

The MS. contains illustrations of the 12 months of the year with their presiding deities Keśava, Viṣṇu, etc. The MS. also contains another work entitled Mṛtyumaṅgala, by Virūpākṣa, which treats of the last rites of a Hindu. This work runs over 18 pages and comes abruptly to an end. The 2nd verse gives the necessary information on the subject.

नानापुराणागमतन्त्रसंग्रहान्
आलोक्य भूयिष्ठपटिष्ठसंसदा ।
श्रीमान् विरूपाक्षकृती हितेच्छया
चक्रे जनानामिह मृत्युमङ्गलम् ॥

III. 386 B. वाजसनेयसंहिता or the white Yajurveda. $12\frac{1}{2} \times 2$ inches. Folia, 172 pierced by a hole through the middle. Lines, 4 and 5 on a page. Ślokas, 2,700. Date ? Character, Newári. Appearance, fresh. Prose and Verse. Correct. Complete.

There are no diacritical marks except in the first few leaves.

III. 387. साधनमाला । $11\frac{1}{2} \times 2$ inches. Folia, 112+146=258 in 2 parts pierced by a hole towards the left. Lines, 6 on a page Ślokas, 7000. Character, ornamental Newári. Date ? Appearance, old. Prose. Incorrect.

The MS. contains the ritual for worshipping almost all the Buddhist Deities.

I 8 A. कुमुदाकरमतिपादानाम् ।
9 A. रत्नाकरगुप्तपादानाम् ।
20 A. पद्माकरपादानाम् ।
43 A. हरिहरस्य ।
91 A. रत्नाकरशान्तिपादानाम् ।
115 A. श्रीकृष्णपादानाम् ।
120 A. करुणाभिधानस्य ।
II 30 A. प्रभाकरकीर्त्तेः ।
66 A. अद्वयवज्रपादानाम् ।
95 A. कुक्कुरीपादानाम् ।
104 A. मध्यमकरुचिधर्म्माकरमतेः ।
112 B. करुणाभिधानस्य ।

DR.RUPNATHJI( DR.RUPAK NATH )

In this MS. there is another work called संक्षिप्ताभिषेकविधिः सामाजिकः which was copied in the reign of Rudra Deva, who is put down by Prof. Bendall in 135 (N.S.). It is measured by 170 ślokas and written in Transitional Gupta, mixed with hooked-top Newári. The name of the author has been rubbed out at the end. But from the 2nd śloka at the beginning we know that his name was Bāgiśvara Kirtti.

III. 388. लक्षहोमविधि by शैवाचार्य्य तेजश्चन्द्र। $8\frac{1}{2} \times 2$ inches. Folia, 27 pierced by a hole towards the left. Lines, 5 on a page. Ślokas, 300. Date N.S. 531. Character, Newári. Appearance, old. Prose. Incorrect.

Post Col. श्रेयोऽस्तु सम्वत् ५३१ वैशाखस्य सितनवम्यां तिथौ लिखितमिदं श्रीकाष्ठमण्डपनगरे श्रीभीमदत्तसोमशर्म्मणाऽलिखित्।

It begins आदौ तु कर्णिका कार्य्या कोणाग्रे द्वितीयके
चतुर्विंशतिपत्राणि तदग्रेवावृत्ते मता
तदाऽष्टदलं कृत्वा तदग्रे वर्त्तुलावृते
चतुरस्रे ततोवाह्ये योन्य(?) समाम्बुजानि च ॥
तन्मध्ये संस्थिता देवी सासुरसदार्च्चिता ॥

In this MS. there is another work on Lakṣa Homa by one Śivācārya. But it begins with Puraścaraṇa.

III. 390. श्राद्धप्रदीप by कृतायुध। $14 \times 2$ inches. Folia, 142 pierced through the middle. Lines, 5 on a page. Ślokas, 2,800. Date La. Saṃ 341. Character, Maithil. Appearance, old. Prose and Verse. Correct.

The book has already been noticed L. 652 and published by the late Ānandarām Baruá of the Indian Civil Service at Calcutta.

The Post Colophon Statement runs thus:—

लसं ३४१ मुडियारग्रामे सप्रक्रियसदुपाध्यायनिजकुलकुमुदिनीचन्द्रवादिमत्तेभसिंहपरमसच्चरित्रपवित्रश्रीविद्यापतिमहाशयेभ्यः पठि(ठ)ता छात्रश्रीरूपधरेण लिखितमदः पुस्तकम् ॥

पक्षे सितेऽसौ शशिवेदराम
युक्ते नवम्यां नृपलक्ष्मणाब्दे।
श्रीपूर्व्वसोमेश्वरचन्द्रकेन
पुस्ती विशुद्धा लिखिता च भाद्रे ॥

DR.RUPNATHJI(DR.RUPAK NATH)

In one of the buffer leaves at the end of the MS. is recorded the birth of one Haladhar.

III. 391. विवाहपटल by वराहमिहिर; उत्पलकृतटीकासम्वलित। 13×2 inches. Folia, 120 (1st leaf is missing), pierced by a hole towards the left. Lines, 5 on a page. Extent in ślokas, 1,800. Character, Newári. Date 521 (N.S.)=1401 A.D. Appearance, old. Prose and Verse. Incorrect.

Varāha Mihira's work on marriage has been described by me in pp. 26-27 of the Nepal Catalogue. The present MS. contains a commentary on it by Utpala. The Commentary is entitled Cintāmaṇi. The commentary comes to an end apparently on the 73rd leaf of the MS. The rest of the MS. contains other topics connected with marriage, by Varāha Mihira.

III. 392. क्रियाकालगुणोत्तर। 12×2 inches. Folia, 144 pierced by a hole towards the left. Lines, 5 on a page. Extent in ślokas, 2100. Date N.S. 304=1184 A.D. Character, Newári. Appearance, old. Prose. Correct. Complete.

Post Colophon Statement. नेपालदेशीय स ३०४ जेष्ठ सुदि १३ गुरौ धबलस्रोतपुरे महासामन्तश्रीरत्नदेवराजे भुक्तं महा श्रीः। हुकाधरन्वय शिवाचार्य्यश्रीश्रीधरराजगुरुणाम् लिखापितम् लिखितं धर्म्मादित्येन। शुभं भवतु।

The place Dhabal-Srota is now known as Dhankhel, about 8 kos from Kathmundu, to the east.

The work is divided into Paṭalas.

It begins:—

ॐ नमः शिवाय।

प्रणम्य शिरसा देवं श्रीकण्ठं उमया सह।
कलयाकलितं कान्तं अमितौजसं शुभप्रदम्॥
कार्त्तिकेय उवाच।
श्रुतास्तथा विविधा मन्त्रा लोकश्चाश्चर्य्यकारकम्।
सिद्धेर्मुक्तिप्रदं सर्व्वं त्वयोक्तं परमेश्वर॥
न श्रुतं गारुडं किञ्चित् सद्यःप्रत्युपकारकम्।
तमाचक्ष्व सुरश्रेष्ठ मम भक्तस्य शङ्कर॥
लक्षणं नागजातीनाम् गर्भोत्पत्तिमशेषतः।
रूपकं सर्व्वनागानां व्यन्तरानाञ्च जातकम्॥

DR.RUPNATHJI( DR.RUPAK NATH )

प्रहयक्षपिशाचानां शाकिनीनाञ्च लक्षणम् ।
बालग्रहाश्च ये क्रूराः पीड्यन्ते वृत्यनिर्घृणा ॥
नारीगर्भकरा ये तु तेषां कथय रूपकम् ।
गोनशानान्तु देवेश वृश्चिकानान्तु लक्षणम् ॥
अन्योऽपि विविधा दुष्टा रासभा कीटलुतयः ।
जराश्च कतिचित् प्रोक्ता असाध्याः साध्यमेव च ॥
ज्ञानयोगक्रियादीक्षा मन्त्राश्चर्य्यलक्षणम् ।
दीक्षितानाञ्च समायातः सिद्धिसाधनसाधकौ ॥
गारुडं लूततं वचः मन्त्रवादं तथैव च ।
तत् सर्व्वं मम देवेश अज्ञोऽहं भवतः पुरः ॥
स्वयं वद महादेव दीनानामभयङ्कर ।

Col.

61 B. इति क्रोधेश्वरस्य कल्पं समाप्तम् ।

63 B. इति अघोरस्य कल्पं समाप्तम् ।

65 A. ज्वरेश्वर अष्टुगणपरिवृतस्य कल्पं समाप्तम् ।

III. 393. शिवधर्म्म (?) । 22½×2 inches. Folia, 285 leaves peirced by two holes at the sides of the centre. Lines, 5 on a page. Extent in ślokas 9000. Date 189 (N.S.) = 1069 A.D. Character, Newári. Appearance, old. Verse. Correct.

Leaves 41. I इति शिवधर्म्म समाप्तः (12 chapters).

Leaves 52. II इति शिवधर्म्मोत्तरः समाप्तः (12 chapters).

Leaves 59. III शिवधर्म्मसंग्रहः समाप्तः (12 chapters).

Leaves 32. IV भगवतो गीतपुराणे धर्म्मगुह्ये राजेन्द्रमोक्षणं उमामहेश्वरसंवादे एकविंशतिमोध्यायः । Having 21 chapters, yet the book is not complete.

Leaves 24. V उत्तरोत्तरः (9 chapters).

Leaves 19. VI इति शिवोपनिषत् (7 chapters).

Leaves 46. VII वृषसारसंग्रहः समाप्तः (24 chapters).

Leaves 12. VIII पञ्चपुत्रिका (16 chapters).

There are eight parts in this work. The whole goes under the name of Śiva Dharma Śāstra or simply Śiva Dharma, which is pre-eminently the name of the first part. The eight parts together are given in one MS., but each is separately paged. At the end of the work we have the following post colophon statement :—

DR.RUPNATHJI( DR.RUPAK NATH )

नवोत्तराशीतियुते शतेऽब्दे
आषाढशुक्लस्य तिथौ तृतीये ।
श्रीशङ्कराख्ये जयति क्षितीन्द्रे
श्रीजज्ज्वलश्चोत्तरठोल्लकेय: ॥
धर्म्माश्रय: सद्गुकुललब्धजन्मा
गुणप्रियो राघवसिंहनामा ।
ज्ञानप्रकाशं शिवधर्म्मशास्त्रम्
शुभप्रतिष्ठं कृतवान् समग्रम् ॥
कर्त्तुरेतेन पुण्येन भूयात् लक्ष्मीरनुत्तरा ।
त्रैलोक्यपूजितं शैवं वाक्यं जयति सर्व्वदा ॥

Below this in another hand.

पादमात्रमिदं शास्त्रं योऽधिर्इत जितेन्द्रिय: ।
तेनाधीतं सर्व्वधर्म्मम् इति नास्त्यत्र संशय: ॥
अर्थशास्त्रमिदं पुण्यं धर्म्मशास्त्रमिदं परम् ।
मोक्षशास्त्रमिदं प्रोक्तं शिवेनामिततेजसा ॥

III. 394. खण्डखाद्यम् । 12×2 inches. Folia, 15 pierced through the middle. Lines, 6 on a page. Ślokas, 350. Appearance, fresh. Date N.S. 470 = 1350 A.D. Character, Newári. Verse. Correct.

It has already been noticed in my Nepal Catalogue, page 89.

III. 395. स्मृतिसार by हरिनाथ । 13½×2 inches. Folia, 200 pierced through the middle. Lines, 5 on a page. Ślokas, 3000. Date La. Saṃ 341. Character, Maithil. Appearance, old. Prose. Incorrect. Complete.

The last Col. इति महामहोपाध्यायश्रीहरिनाथविरचिते स्मृतिसारे व्यवहारखण्ड: समाप्त: ।

Post Col. Statement.

दौलिकग्रामवास्तव्य: सोऽलेकोऽलिखदर्जुन: ।
स्मृते: सारमिमं वीक्ष्य चत्वारिंशत् समा वय: ॥
लक्ष्मणक्ष्मापतेरब्दे चन्द्रवेदाग्निलक्षिते ।
फाल्गुनीषु शनेर्वारे भुवं धीरे रतिप्रभौ ॥

III. 396. विष्णुपूजाकल्पलता । 15×2 inches. Folia, 115 pierced through the middle. Lines, 4 on a page. Ślokas, 1800. Date Śaka 1552. Character, Newári. Appearance, old. Prose. Incorrect.

DR.RUPNATHJI( DR.RUPAK NATH )

The MS. was copied at the instance of Jagajjyotirmalla of Bhātgāon. The work was composed by Bhairava Siṃha of Mithilā. It treats of the worship of Viṣṇu and it is an athoritative work.

श्रीमद्भैरवसिंहस्य तीव्रबुद्धिमहीभृतः ।
कृपाकलवती विष्णुपूजाकल्पलताकृतिः ॥

इति समस्तप्रक्रियाविराजमानमहाराजाधिराजश्रीनरसिंहात्मजसमस्तप्रक्रियोपेत-श्रीमहाधिराजाधिराजश्रीमद्रुद्रनारायणानुजसमस्तप्रक्रियालङ्कृतमहाराजाधिराजहरि-चरणपरायणश्रीमद्भैरवसिंहदेवकृतौ विष्णुपूजाकल्पलतापरिपूर्णमिति ।

It is a book as yet unknown.

III. 397 A. वास्तुशास्त्र । 11 × 2 inches. Folia, 61 pierced by a hole towards the left. Lines, 7 on a page. Extent in slokas, 1200. Date ? Character, Newári. Appearance, old and worm-eaten in places. Verse. Incorrect.

It begins in the form of a Tántrik work with the description of a hermitage on the Ganges in the Himálayas. The interlocutors are Vriddha Garga and Jákṣuki.

Leaf 4 B. युग्माध्याये प्रथमाध्यायः ॥
6 A. वास्तुविद्यायां भूमिपरीक्षा द्वितीयोऽध्यायः ॥
8 A. „ दिक्प्रश्नं तृतीयः ॥
10 A. „ नगरसन्निवेशः चतुर्थः ॥
11 B. „ राजकुलनिवेश पञ्चम अध्यायः ॥
13 A. „ देवताविभाग षष्ठः ॥
15 A. „ द्वारदैवत सप्तमः ॥
16 A. „ द्वारदैवतको नाम अष्टमः ॥
17 B. „ द्वारगुणदोषा नाम नवमः ॥
18 A. „ द्वारदोषो नाम दशमः ॥
19 B. „ वास्तुशान्तिक द्वादशमः ॥
20 B. „ गृहप्रवेशकर्म्म नाम त्रयोदशमः ॥
21 B. „ नवकर्म्मिको नाम चतुर्दशमः ॥
23 A. „ वस्तुवेष्टितको नाम पञ्चदशमः ॥
25 A. „ वास्तुमध्ये निर्वेशः नाम षोडशोध्यायः ॥
26 B. „ कूपप्रमस्थानो सप्तादशमः ॥
27 A. „ ब्रह्मस्थापितो नाम अष्टादशमः ॥

DR.RUPNATHJI(DR.RUPAK NATH)

| | | |
|---|---|---|
| 29 A. | वास्तुविद्यायां वास्तुच्छेदिका नामः एकोनविंशतिमः ॥ | |
| 30 A. | ,, ,, ,, | विंशतिमः ॥ |
| 32 A. | ,, | शालानिर्म्माणिको नाम एकविंशतिमः ॥ |
| 34 A. | ,, | स्थानिवेशो नाम द्वाविंशतिमः ॥ |
| 35 B. | ,, | द्वारच्छेदो नाम त्रयोविंशतिमः ॥ |
| 36 A. | ,, | छायालक्षणं नाम चतुर्विंशतिमः ॥ |
| 38 B. | ,, | नवग्रहविकर्म्म पञ्चविंशतिमः ॥ |
| 40 B. | ,, | उच्छ्रयनिको नाम षड्विंशतिमः ॥ |
| 43 B. | ,, ,, ,, | सप्ताविंशतिमः ॥ |
| 45 B. | ,, | प्रासादविभागो नामः अष्टाविंशतिमः ॥ |
| 52 A | ,, | प्रासादसूत्र ऊनत्रिंशतिमः अध्यायः ॥ |
| 53 B | ,, | नक्षत्रयोगं नाम त्रिंशतिमः ॥ |
| 54 B | ,, | बलिकर्म्म नाम एकत्रिंशतिमः ॥ |
| 55 B. | ,, | बलिकर्म्मिका नामः द्वात्रिंशतिमोऽध्यायः ॥ |
| 59 B. | ,, | प्रतोलीसूत्र च(?)त्रिंशमः अध्यायः ॥ |
| 61 B | ,, | द्वारनिर्द्दशिका नाम चतुस्त्रिंशतिमः ॥ |

This MS. is not complete The works, which begin in this way, are generally long, and it is in this form that most of the Śilpa, Jyotiṣa and other works were written, as would be apparent from the large number of works quoted in Bhaṭṭotpala's commentary on the Bṛhat Saṃhitā. The MS. here contains only a fragment of Vástu Śāstra

III. 397 B. कातन्त्रवृत्तिविवरणपञ्जिका by त्रिलोचन दास । 13 × 2 inches. Folia, 79 pierced by a hole through the middle. Lines, 4 on a page. Extent in ślokas, 950. Date. La. Saṃ. 156 = 1273 A.D Character, Nāgari. Appearance, old. Prose. Correct.

Trilocana Dāsa's work has been published in Calcutta and at Noākhāli The present MS. contains only the chapters on Kṛt

It ends इति श्रीत्रिलोचनदासविरचितायां कातन्त्रवृत्तिविवरणपञ्जिकायां कृत्सु चतुर्थपादः समाप्तः ॥ लसं १५६ फाल्गुणवदि २ नयो ॥ ठक्कुरश्रीप्रजापतिना लिखितम् ।

Then come the usual apologies of the scribe.

III. 397 C. भोजदेवसंग्रह । 11 × $1\frac{1}{2}$ inches. Folia, 99 pierced by a hole towards the left. Lines, 4 and 5 on a page. Extent in ślokas, 1200. Date ? Character, Newári. Appearance, old. Prose. Incorrect.



DR.RUPNATHJI( DR.RUPAK NATH )

The leaves of the MS. are in disorder..

See p. 120 of my Nepal Catalogue.

III. 397 D. योगीश्वरपद्मनाभसंग्रहौ । $11\frac{1}{2} \times 2$ inches. Folia, 63 pierced by a hole towards the left. Lines, 5 on a page. Extent in slokas, 930. Date ? N.S. 540=1420 A.D. Character, Newári Appearance, fresh Prose and Verse. Incorrect.

There is a colophon in leaf 24 A which runs thus —

श्रीवाराणस्यां उपाध्यायश्रीपद्मनाभेन कथितम् इति सद्यःसूतिनिर्णये योगीश्वरसंग्रहप्रेतकृत्यनिर्णयपद्मनाभसंग्रहयोः समुच्चयः समाप्तः ॥

This shows that Yogīśvara and Padmanābha jointly compiled a Smṛti-work. Yogisvara seems to have done the Tithyādi Nirṇaya, see col. in p. 185 of my Nepal Catalogue.

The chapter on Pretakṛtya is attributed to Padmanābha. The present colophon says that Yogīśvara is responsible for the chapter on Sūtaka, *i.e.*, impurity for the birth of a son. The present MS. contains the Pretakṛtya Section and not the Tithyādi Nirṇaya From leaf 24 to the end, it contains another work on Śráddha with the following introduction —

अथ श्राद्धविधिं वक्ष्ये यथा च मनुभाषितम् ।
येन सम्पूर्णतां यान्ति हव्यकव्यानि यानि च ॥

This portion may be taken as a part of the work and attributed to Padmanābha.

An examination of the three MSS of this work, III. 360 G, copied in N.S. 366, and the present MS., and the paper MS. No. 1294 A., shows that the work is a very ancient one. It quotes from such works as Pracetāḥ, Vṛddha Pracetāḥ, Garga, Kārṣṇājini, Bhṛgu, Marīci, Pulasta, Śākaṭāyana, Vārtikakára, not to speak of the 20 well-known authors of Smṛti.

III. 398. वैष्णवामृतसारोद्धारः । $13 \times 2$ inches. Folia. 137 pierced by a hole at the middle. Lines, 5 on a page. Ślokas, 2700 Date La. Saṃ. 416 Character, Maithil. Appearance, old. Verse. Correct.

The last Colophon reads · इति वैष्णवामृतसारोद्धारे स्कन्दपुराणीये दीनानाथपुराणीये कार्त्तिकमाहात्म्यं समाप्तम् ।

The MS was copied by Śrī Maṇḍala Śarmā.

DR.RUPNATHJI( DR.RUPAK NATH )

Leaf 2 A. फलं वैष्णवधर्म्मस्य कथयस्व सुविस्तरम्
येनाहं त्वत्प्रसादेन ++पदं परं हरेः।
कार्त्तिकस्य तु माघस्य माहात्म्यं वक्तुमर्हसि
दीपदानस्य माहात्म्यं व्रतानां नियमस्तथा ॥
गोपीचन्दनमाहात्म्यं तुलसी × × × ।

III. 399. व्रतपद्धतिः by रुद्रधरः । $14\frac{1}{2} \times 2$ inches. Folia, 63 pierced through the middle. Lines, 5 on a page. Ślokas, 1400. Date, La. Saṃ. 286. Character, Maithil. Appearance, old and worm-eaten on both sides. Prose. Correct.

Post Colophon लसं २८६ ज्यष्ठस्य कृष्णपक्षे त्रयोदश्यां।
बुधवासरे, रविकरालिखितापुस्ती वस्पुपसुवस्थितं ॥

III. 400 25 × 2 inches. Folia, 15 pierced by 3 holes. Lines, 5, 6, 7 on a page. Extent in ślokas, 2000. Date? Character, Newâri. Appearance, fresh. Prose. Correct.

It contains the declensions of roots of the Adādi class in all the hundred and eighty Vibhaktis.

III. 401 सिद्धसन्तानसोपानपद्धति by यशोराज। $8\frac{1}{2} \times 2\frac{1}{2}$ inches. Folia, 58 pierced by a hole towards the left. Lines, 6 on a page. Ślokas, 700. Date La. Saṃ 184. Character, Maithil. Appearance, old. Prose. Correct.

The work has already been noticed in my Nepal Catalogue, p. 67. That was defective both at the beginning and at the end. It had only 15 Paṭalas. But the present MS. has 18 and is complete.

Its Colophon :— इति गोपालमजश्रीयशोराजविरचितायां सिद्धसन्तानसोपानपंक्त्य-भिधानायां सिद्धमार्गप्रकाशिकायां वृत्तिविशेषानिर्णयो नाम अष्टा-दशमः पटलः । इति सिद्धसन्तानसोपानपंक्तयभिधाना श्रीमसपद्धतिः समाप्ता ॥

बालवागीश्वराख्यस्य बालवागीश्वरस्य च ।
श्रीयशोराजचन्द्रस्य कृतिरेषामहात्मनः ॥
शुभमस्तु लसं १८४ आषाढ़सुदि रविवारे ।

For 402A see 360 F

DR.RUPNATHJI( DR.RUPAK NATH )

III. 402 B. चण्डमहारोषणतन्त्रपञ्जिका । 10×2½ inches. Folia, 34 pierced through by one hole towards the left. Lines, 8, 9, 10 on a page Extent in ślokas, 1000 Date N.S. 417, Character. Newári. Prose Appearance. old. Correct.

The last Colophon is इत्यकल्लरवीरचण्डमहारोषणतन्त्रस्य पद्मावती नाम पञ्जिका समाप्ता ।

The original Tantra is divided into 25 Paṭalas. The MS., which is a commentary on it, is also divided into 25 Paṭalas

It begins — ॐ नमश्चण्डमहारोषणाय ।

मग्नं येन जगच्चराचरमिदं मोहान्धकारोदरे ।
प्रज्ञोपायविभागभास्करकरैः व्यक्तं समुद्दीपितम् ॥
× × × माधिसाङ्गं पुरुषः स्वस्वधाङ्ग स्वयं ।
सोऽयं मत्सुखसाधनाय जगति व्यक्तप्रभस्तिष्ठतु ॥

एवं मया इत्यादि संगीतिकारः । निदानवाक्यमेतत् । यस्मात् संगीतिकारेण सूत्रतन्त्रादौ । अवश्यं वक्तव्यम् । भगवतो वचनात् । तथा च ।

एवं मया श्रुतमित कृत्वा भित्तव मम वचनम् ।

संगीतव्यमित्यादि । एवं सति ॥

श्रद्धावतां प्रवृत्त्यर्थं शास्तापर्षञ्च साक्षिणि ।
देशकालौ च निर्दिष्टौ स्वप्रामाण्यप्रसिद्धये ॥

इति प्रतिपादितं भवति । तत्र । एवमिति यथा संगास्यामि । मयेत्यनेन विपरीतश्रुतपरम्पराश्रुतयोर्निरासः । एतेन आत्मनासम्बन्धात् श्रुतमविपरीतञ्च प्रतिपादयति । श्रुतमिति श्रोत्रज्ञानेन अधिगतमिति । एकस्मिन् समये इति । एकस्मिन् काले । अन्यस्मिन् काले अन्यदपि श्रुतमित्यर्थः । एतेन आत्मनो बाहुश्रुत्यं एतत्तन्त्रस्य आदौ लभ्यञ्च प्रतिपादयति । भगवानिति । भगा ऐश्वर्य्यादयः । तथा च ।

ऐश्वर्य्यस्य समग्रस्य दानस्य यशसः श्रियः ।
कायस्यापि प्रयतस्य षण्णां भगः इति श्रुतिः ॥

तानि विद्यन्ते अस्य इति । रागादिक्लेशभञ्जनाद्वा । वज्रसत्त्व इति । वज्रं अभेद्यं सत्त्वं अर्थक्रियाकारित्वमस्य इति । अथवा वज्र इव वज्र स चासौ सत्त्वप्राणीवेति । सर्व्वेत्यादि सर्व्वे च ते तथागताश्च तेषां कायवाक्चित्तज्ञानात् शरीरतत्त्वम् तस्य हृदयमत्यन्तमभिलषणीयत्वात् । तदेव वज्रधात्वीश्वरीभगं वज्रोलिङ्गं तस्य धातुः साम्भृतविवृतत्वादि-

DR RUPNATHJI( DR RUPAK NATH )

लक्षणं बोधिचित्तं तत् × × व्या प्रज्ञावज्रधातुनासेवितत्वात् तस्याः। तत् वराङ्गे भगे विजहारेति। विहृतवान् वज्रपद्मसंयोगेन सम्पुटयोगेन स्थितवान् इत्यर्थः। अयञ्च विहारः प्राकृतजनस्य अत्यन्त गुप्तः भवति किं पुनः भगवतो वज्रसत्त्वस्य। ततश्च अर्थादुक्तं भवति। सुमेरुगिरिमूर्द्धिवज्रसत्त्वभूमौ वज्रमणिशिखरकूटागारे विहरतिस्मेति। एतेन शास्ताकालो देशश्चोक्तः। पर्षल्लोकमाह अनेकैश्चेत्यादि। वज्रयोगिनः। श्वेताचलादयः। वज्रयोगिन्यो मोहवज्रादयः। तेषां तासां च गणाः समूहाः। एकरूपास्तैः। बहुवचनमेकवचनस्यापि पञ्चतथागतत्वात्। तद्रूपयतीति। उपदर्शने। श्वेताचलेति भगवान् भगवती देहगतरूपज्ञानेन एवं पीताचलेनेति भगवती देहगतगन्धज्ञानेन। रक्ताचलेनेति भगवतीदेहगतरसज्ञानेनेति। श्यामाचलेनेति भगवती देहगतस्पर्शज्ञाने। मोहवज्राचेति भगवत्या भगवद्देहगतरूपज्ञानेन। पिशुनवज्राचेति भगवद्देहगतगन्धज्ञानेनेति। रागवज्राचेति भगवद्देहगतरसज्ञानेनेति। ईर्षावज्राचेति भगवद्देहगतस्पर्शज्ञानेन। स्वयन्तु भगवान् भगवतीदेहशब्दज्ञानरूपः। भगवती तु भगवद्देहगतशब्दज्ञानरूपा। अतो नैतत्प्रभेदः कृतः॥ एवं प्रमुखैरिति। एवं प्रकारैः। चक्षुषा घ्राणेन रसनया कायेन श्रोत्रेण रूपेण वेदनया संज्ञया संस्कारेण विज्ञानेन पृथिव्या जलेन तेजसा आकाशेन इत्यादिभिरित्यर्थः। एते नैवंविधे विहारे पर्षद्भूयोगिनां तादृश्यो बोधिचित्ते तु कथितं भवति। अतिगुप्तत्वात् ननु तदा त्वया कथं श्रुतमिति चेत्। अथेत्यादि अयमर्थः। तेन विहारेण यदा चतुरानन्दसुखमनुभूय तदनन्तरं सप्तपुरुषेषु महाकरुणामामुखीकृत्यात्। एवं कृष्णावलसमाधिं समापद्य इदं वक्ष्यमाणमुदाजहार उदाहृतवान्। तदाश्रुता मया इत्यर्थः। संगीतकारस्य मम वज्रपाणेः श्रोत्रेन्द्रियरूपत्वात् भगवद्भगवतीदेह एव स्थितेन मया श्रुतमिति भावः। किमुदाहृतवान् भावाभावेत्यादि। भावः आनन्दपरमानन्दविकल्पः। अभावे विरमानन्दविकल्पः। ताभ्यां विनिर्मुक्तः त्यक्तः। चत्वार आनन्दाः। सूत्रप्रज्ञोपायाभ्यां अन्योन्यानुरागलक्षणम् आलिङ्गनचुम्बनस्तनमर्द्दननखदानादिना यन्त्रारूढबन्धेन वज्रपद्मसंयोगं यावदानन्दः। एतेन किञ्चित् सुखमुत्पद्यते।

The End — योगिनीछन्दः योगिनीसंयोगः। तत्र नन्दितमुत्पन्नम्। प्रस्फुटताकरणमेव सिद्धिः कारणमिति। पूर्व्वव्याख्यातमेव। महामुद्राधिष्ठिस्तु पूर्व्वं व्याख्यातैवेति देवतासाधनं पटलः। इति पञ्चविंशतिपटलव्याख्या।

DR.RUPNATHJI( DR.RUPAK NATH )

इदमित्यादि संगीतिकारवचनम् । इदमुक्तलक्षणं सकलं तन्त्रम् भगवा-
नवोचत् कथितवान् । अभ्यनन्दन् अनुमोदितवन्तः इति । समाप्तम् इति
निष्पन्नम् । ये धर्म्मा इत्यादि । ये धर्म्माः सप्त । विज्ञाननामरूपषडायतन-
स्पर्शवेदनाजातिजरामरणाख्या । ते हेतुभ्यः पञ्चभ्यः अविद्यासंस्कार
तृष्णोपादानभवाख्येभ्यः भवन्ति । हेतुः कारणं तेषां यथागदनात् तथा-
गतः । अवदत् उक्तवान् । कार्य्यकारणयोर्य्यो निरोधः उपशमः निर्व्वाणः
एवं स्वादितु शीलमस्य इति महाश्रमणः इति ।

विद्वान् शूरस्तपस्वी च महोत्साहस्सवीर्य्यवान् ।
अद्भुतस्य च कर्त्ता हि महानित्यभिधीयते ॥

शमितपापत्वात् संश्रमणः । क्लेशोपक्लेशशमनात् वेति ।
कृत्या व्यक्ततरां मया पुनरिमां पञ्जीं गुरोराज्ञया ।
श्रीतन्त्रहस्यसाररचितां नाम्ना च पद्मावलीं ।

प्राप्तं पुण्यमनन्तविस्तरतरं यत्तेन लोकः कलौ ।
प्रज्ञोपायसमागमैकरसिकश्रद्धाञ्जलीस्तु द्रुतम् ॥

Post Colophon Statement. कृतिरियं महापण्डितमहासुखवज्रपादानाम् इति ।
सम्वत् ४१७ फाल्गुनकृष्णदशम्यां मङ्गलवासरे लिखनं समाप्तमिदमिति
राज्ञो श्रीमत् अनन्तमल्लदेवस्येति शुभमस्तु सर्व्वजना ।

After this there are two verses in two different hands.

III. 402 C चर्य्याचर्य्यटीका । $12\frac{1}{2} \times 2$ inches Folia, 69 pierced through by one hole towards the left Lines, 5 on a page Extent in ślokas, 1300. Date ? Character, Bengali. Appearance, fresh. Prose. Correct.

Begins :—

ॐ नमः श्रीवज्रयोगिन्यै ।

श्रीमत् सद्गुरुवक्त्रपङ्कजरसास्वादस्फुरद्धीरयो-
र्नत्वा श्रीकुलिशेशमद्वयधियं श्रद्धाप्रसन्नाननः ।
श्रीलूयीचरणादिसिद्धरचितेप्याश्चर्य्यचर्य्याचये
सद्धर्म्मावगमाय निर्म्मलधियां टीकां विधास्ये स्फुटं ॥

काया तरुवर पञ्च वि डाल । चञ्चलचिए पइठो काल । ध्रु ।
दिटि करिय महासुखपरिमाण । लुइ भनइ गुरु पुच्छिअ जान । ध्रु ।
सयल साहिय काहि करि अइ । सुखदुखतें निचित मरिअइ ।
एड़िएउ छान्दक बान्ध करक पाटेर आश । सुनुपाखभिति लाहुरे
पास । ध्रु ।
भणइ लुइया मे साले दिठा धमनचमन वेणि पाण्डिवइठा । ध्रु ।

DR PURNATHJI ( DR. RUPAK NATH )

III. 403 A. माघकाव्यटीका । ( वल्लभा नाम ) । 14 × 2 inches. Folia, 349 pierced through by one hole at the middle. Lines, 6 on a page. Extent in slokas, 8400. Character, Maithil. Date, La Saṃ. 428. Appearance, old Prose. Correct.

This is a commentary on Māgha Kāvya by Vallabhācārya.

It begins :— ॐ नमश्चण्डिकायै श्रियः पतिरित्यादि—
श्रियः लक्ष्म्याः पतिः स्वामी हरिः नारायणः ।

The End. श्रिया । अथ शिरश्छेदानान्तरं चैद्यस्य शिशुपालस्य उत्तुषः शरीरात् निरीय निर्गत्य औपेन्द्रं कृष्णसम्बन्धि वपुषि गतं धाम तेजः विस्मिताक्षैः प्रफुल्लनयनैः नरेन्द्रैः राजभिः ईक्षाम्बभूवे अवलोकयामासे । किं भूतं भगवत्या श्रिया लक्ष्म्या जुष्टं सेवितं तथा दिवौराकाशपतितैः पुष्पवर्षैः सह पटहरवैः दुन्दुभिध्वनिघातैः अन्वितम् अनुगतम् । ऋषिगणैः नारद-प्रभृतिभिः स्तूयमानम् । प्रकाशेन देहद्योतेन आकाशे दिनकरकरान् निक्षिपत् तिरस्कुर्वत् वपुष पञ्चमपतस्मिल् । हस्वान्ताशौ तद्धितः इति सत्वम् । उपेन्द्रस्य इदमिति औपेन्द्रं तस्येदम् इति अण् । ईक्षाम्ब-भूव इति कर्म्मणि लकारः । श्रीशब्दलक्षणत्वात् काव्यस्य प्रतिसर्ग-समाप्तौ श्रीशब्दप्रयोग इति सर्व्वौरसनीय इति । इति वल्लभानाम माघटीका समाप्ता । इति लसं ४२८ माघशुक्लपूर्णिमायां गुरौ कक्कवीर ग्रामे श्रीपरमानन्देन उत्तमपुरग्रामीयेन लिखितमिदं वल्लभाचार्य्यकृतं माघटीकमिति ।

III. 404 A. तीर्थविधिः । 14½ × 2 inches. Folia, 138 pierced through the middle. Lines, 5 on a page. Extent in slokas, 2500. Character, Maithil. Date ? Appearance, fresh. Prose. Correct.

It begins :— कनकनलिनलक्ष्मीस्पर्द्धिराधाकुचाग्र-
अर्पितनयनभृङ्गस्मेरवक्त्राम्बुजश्रीः ।
नवगगनतमालश्यामलामञ्जुगात्रः
क्षपयतु मम कर्म्मक्रूरमक्रूरमित्रः ॥
श्रीकृत्यकल्पद्रुमपारिजात-
रत्नाकराद्गीन् अवलोक्य यत्नात् ।
प्रणम्य मूर्द्ध्ना मधुसूदनाय
वाचस्पतिः तीर्थविधिं तनोति ॥

DR.RUPNATHJI( DR.RUPAK NATH )

It treats of पुरुषोत्तम, भुवनेश्वर कोणार्क, विरजाक्षेत्र, गङ्गा, प्रयाग and the confluence of the Ganges and the Gandakī. The work is not complete. It is a liturgical work on holy places.

III. 404 B. प्रबोधचन्द्रोदयटीका। 15×2 inches. Folia, 86 pierced through the middle. Lines, 5 on a page. Extent in ślokas, 1500. Character, Maithil. Date N.S. 768. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो महागणेशाय ।

चन्द्रार्कवायुवह्न्यम्बुनभोभूहोतृमूर्त्तिभिः ।
येन व्याप्तमिदं विश्वं तं नौमि परमेश्वरम् ॥
प्रणम्य विज्ञान् बुधमालवंश्यः
श्रीमान् रुचिर्भानुकरस्य पुत्रः ।
करोति टीकां सुधियां सुखाय
प्रबोधचन्द्रोदयनाटकस्य ॥

तत्रादौ तावत् सर्व्वविद्यान्वितः सकलशास्त्रविशारदः सकलवेदान्ततत्त्वज्ञः संसारदुःखविमुखः महाकारुणिकः श्रीकृष्णमिश्रः सकलविद्यास्वरूपं निरूपयन् दुःखमयसंसारसागरनिमग्नसकललोकान् उज्जिहीर्षन् नाटक-कौतुकव्याजेन भङ्ग्यान्तरेणेव सोपदर्शनेन रसमुत्पादयन् सकललोकान् प्रत्यक्षीकृत्य वेदान्तसिद्धान्तम् बोधयितुं शान्तरसप्रधानं प्रबोधचन्द्राभि-धानम् नाटकमारभमानः नान्दीश्लोकमवतारयति ॥
मध्याह्नेत्यादि ।

Leaf 4 B. सहजसुहृदः स्वभावतोमित्रस्य राज्ञः प्रभोः तेजस्विनस्य कीर्त्तिवर्म्मणः कीर्त्तिः (रक्षावती कीतिः शरीं) ख्यातिः वर्म्म वर्द्धति देवस्य द्युतिमतः दिग्विजयव्यापारो अहङ्कार पूर्व्वकाविषयप्रवृत्तिः विपक्षाः कामक्रोधाद्याः प्रबोधप्रातिकूल्यात् रक्षावती संयमवती क्षितिः शरीरं भोगायतनत्वात् अमात्या यमनियमादयः साम्राज्यं स्वातन्त्र्यम् अर्जितं इन्द्रियोपरतिपूर्जितं शान्तिरसप्रयोगाभिनयः ।
उपनिषन्निरूपणं ।
आत्मोपासनं वा आत्मा वा श्रोतव्य इति वचनात् ।

The End. श्रीचन्द्रसिंहस्य नृपस्य वाक्यैः ।
प्रबोधचन्द्रोदयनाटकस्य ।

DR.RUPNATHJI( DR.RUPAK NATH )

ग्रन्थानमेकानुपजीव्य यत्नात्
टीकाकृतेयं रुचिनात्मबुद्ध्या ॥
नमस्काराञ्जलिर्मौलौ निधायाभ्यर्थये सतः ।
मनागालोचनेनायं सफलः क्रियतां श्रमः ॥
संदृश्यते सज्जनदृष्टिपूतं सर्व्वं भवेल्लोकपरिग्रहाय ।
टीका तदेषा मदनुग्रहेण सद्भिर्मनागप्यवलोकनीया ।

इति श्रीरुचिकरविरचितायां प्रबोधचन्द्रोदयटीकायां षष्ठोऽङ्कः । नेपालसम्वत् ७६८ श्रावण वदि दशम्यां तिथौ लिखितेयं प्रबोधचन्द्रोदयटीका । श्रीधर्म्मपतिशर्म्मणेति ।

III 404 C रत्नावली । 13 × 2 inches Folia, 40 pierced through the middle. Lines, 5 on a page. Extent in slokas, 1000. Character, Bengali. Appearance, old. Date, La sam. 458 Prose and Verse Correct.

Post Colophon Statement

अब्दे लक्ष्मणसेनस्य वसुवाणाब्धिलक्षिते
ज्येष्ठशुक्लदशम्यां तु ग्रामे भौरनामके ।
वहुवाडिकुलोद्भूतः नानाविद्याकरः सुधीः
जीवनाथसुतः राहुः लिखितं पुस्तकं तेन ॥

III 404 D कर्पूरमञ्जरीनाटिका । 15 × 2 inches. Folia, 35 pierced through the middle. Lines, 5 on a page. Extent in slokas, 700. Character, Maithil. Date, La. Sam 507. Appearance, fresh. Prose and Verse. Correct

Post Colophon Statement. इति निष्क्रान्ताः सर्व्वे ।
चोठंर जवणि अन्तरं समाप्तम् ॐ
सिट्ठ ज्जेव मडीअखो दिवि उणो जस्सिं पराणं उणो ।
आयाओ जणनिव्वजेण गणिआ लट्ठं जसं निम्मलं ॥
तत्पुत्तो कइसेहरत्ति भणिओ मणमि कईनच्च जो ।
जाओ सो गुणसागरो रहरई भूदेवचूड़ामणि ॥
अज्ज विआन्तुकाण अविका दक्कुरतु णं जस्स ।
तिहुअनरभिजनाणं कालं णो विम्भअं कुणइ ॥
तस्स मज्झिमसुदो दिअहे हिन्तिति हिज्जपदिदहसुद्धि ।



DR.RUPNATHJI( DR.RUPAK NATH )

सुठु एदमविलम्बिदहत्थोपांत्थिग्रं धणवग्रड्ड णिहहम्म ग्रों ।
लषं ५०७ ग्राश्विन शुक्लैकादश्यां शुक्रे विषपिग्रामे श्रीनारायणशर्म्मं
लिखति सत् पुस्तकमिदमिति ।

I 1585 C सौन्दरानन्दकाव्यम् । 22 × 2 inches. Folia, 35 pierced by two holes. Lines, 6 on a page Ślokas, 1400. Date N S 396 = 1276 A.D. Character, Newári (ornamental) Appearance, very old, and in a very miserable and dilapidated condition All the leaves have been half-destroyed lengthwise, still we have gleaned the following information from what remains.

(सुव)र्णाक्षीपुत्रस्य साकेतकस्य भिक्षोराचार्यस्य ।
भदन्ताश्वघोषस्य महाकवेः महावादिनः ॥
सहस्रमेकं शतानि चत्वारि श्लोक ... ... ... ... ।
... ... ... ... सम्वत् ३९६ पौष सुदि ॥
... ... ... ... ... ... ।

Fortunately among the paper MSS. newly collected, there is a copy of this work, which has saved from oblivion a great work by Aśvaghosa, the celebrated author of Buddhacarita Mahákávya, who has been described as the son of Suvarṇākṣi and belonging to Saketa. He is also described as a great poet and a great orator

# PALM LEAF MANUSCRIPT

IN

# PRIVATE COLLECTIONS, NEPAL.

**किरणतन्त्र** । Place of deposit, Pundit Sūrya Carana Rájopādhyāya (of Bengali extraction) 12 x 2 inches Folia, 99 but leaves 1, 2, 3, 4, 5, 7, 8, 9 are missing and many leaves have lost their page marks, pierced by 2 holes towards the left and right Lines, 6 on a page. Ślokas, 2700 (calculating the whole). Character, Tenth Century Transitional character. Date N.S. 44=924 A D. Verse Incorrect. Appearance, old. Incomplete

Last Col. इति किरणाख्यमहातन्त्रं चतुःषष्टिपटलः ॥ ० ॥
समाप्तञ्चेदं किरणाख्यं महातन्त्रम् सप्तत्यधिकद्विसाहस्त्रमिति (?) ॥ ० ॥
सम्वत् ४४ ( जैष्ठ्र ) मासे लिखितमिदमिति ॥ शुभमस्तु ॥

Post Col. श्रीभक्तपुराधिवासिनो भट्टपण्डिताचार्य्य श्रीउदयपालसोमस्य पुस्तकमिदम् । ग्रन्थप्रमाण सहस्त्र २ शत ७ ॥

The following is the table of contents —

(The obverse page of this table has been effaced so that the entries cannot be fully read.)


| Subjects | Number of Patal |
|---|---|
| पशुविचारणापटलः ... ... ... | × |
| आहारविहारपटलः ... .. ... | × |
| शिवविचारपटलः ... ... ... | × |
| शक्तिविचारपटलः ... ... ... | × |
| दीक्षाविचारपटलः ... ... ... | 6. |
| मन्त्रशिवशक्तिविचारपटलः ... ... | × |
| तत्त्वविचारपटलः ... ... ... | × 9 |
| शिवशक्तिविचारपटलः ... ... ... | 10 |
| ज्ञानभेदविचारपटलः ... ... ... | 11 |
| मन्त्रोद्धारविचारपटलः ... ... ... | 12 |
| लिङ्गार्च्चनविचारपटलः ... ... ... | 14 |


DR.RUPNATHJI(DR.RUPAK NATH)

| Subjects. | Number of Paṭal. |
|---|---|
| अग्निकार्य्यविधिः ... ... ... | ×(15) |
| अग्निकुण्डविचारः ... ... ... | (16) |
| गृहलक्षणद्वारलक्षणं ... ... ... | 19 |
| रजोमण्डलविधिः ... ... ... | 20. |
| अङ्गलक्षणपटलः ... ... ... | × |
| अङ्गयागः ... ... ... ... | 25 |
| गणपतियागः ... ... ... | 26 |
| नवग्रहयागः ... ... ... ... | 29 |
| अंशभेदविचारः ... ... ... | 30 |
| नित्याचारविधिः ... ... ... | 31 |
| योगीश्व(र) ... ... ... ... | × |
| भिक्षाटनं ... ... ... ... | 33 |
| मृत्युञ्जययागः ... ... ... ... | 34 |
| अनध्यायपटलः ... ... ... | 35 |
| पवित्रारोहणविधिः ... ... ... | 36 |
| शिवा ... ... ... ... | 36 |
| गुरुपरीक्षा ... ... ... ... | 38 |
| शिवा ... ... ... ... | |
| शिवशिवाज्योतिषाविर्भूति चतुष्कविचारः ... | 39 |
| ... ... ... ... ... | (40) |
| व्रतेश्वरयागः × [illegible]विचारः ... ... | 41 |
| शुद्धाशुद्धिविचारः ... ... ... | 42 |
| महापञ्चपातकादिप्रायश्चित्तविधिः ... ... | 43 |
| × × × ग.प्रायश्चित्त पटलः ... ... | 44 |
| भोजनासनविधिः ... ... ... | 45 |
| पात्रशुद्धिः ... ... ... ... | 46 |
| निम्नस्नानादि प्रायश्चित्यः ... ... ... | ×(47) |
| × × × ण विधिः ... ... ... | 48 |
| समयी (?) पुत्रकसाधकाचार्य्यवृत्तिः ... ... | 49 |
| साधनविधानपटलः ... ... ... | 50 |
| अव्यक्तलिङ्ग ( लक्षणम् ) ... ... | ×(51) |
| व्यक्तलिङ्गलक्षणम् ... ... ... | 52 |

DR.RUPNATHJI( DR.RUPAK NATH )

| Subjects. | Number of Paṭal. |
| --- | --- |
| व्यक्ताव्यक्तलिङ्गलक्षणम् पीठलक्षणञ्च ... ... | 53 |
| भूपरीक्षाशल्योद्धारश्च ... ... ... | 54 |
| न × × × क लक्षयोगपटलः ... ... | 55 |
| देवाधिवासनदेवप्रतिष्ठाविधिपटलः ... ... | 56 |
| वृषभप्रतिष्ठा ... ... ... ... | × |
| × × × नाद्धारपटलः ... ... ... | 57 |
| योगाभ्यासपटलः ... ... ... | 58 |
| उत्क्रान्तिपटल (?) ... ... ... | 59 |
| अन्त्येष्टिपटलः ... ... ... | 60 |
| × × × × विधिः ... ... ... | 61 |
| पञ्चब्रह्मोद्धारपटलः ... ... ... | 62 |
| लिङ्गोद्धारपटलः ... ... ... | 63 |
| मातृकायागपटलः ... ... ... | × (64) |

इति किरणाख्य महातन्त्रस्य पटलपरिपाटिकालिखितम् स्मरणार्थं समाप्तम् ।

This is an interlocution between Garuḍa and Bhagaván Tripureśvara.

The 10th Paṭala begins — गरुड़ उवाच,—

किमर्थं तानि वक्तीश कथं तेषां कियन्ति वा ।
के ते येषां महादेव सर्व्वमेतत् ब्रवीषि मे ॥

भगवान् उवाच,—

तानि वक्ति स मुक्त्यर्थं न मुक्तिः साधनादृते ।
साधनं तत्र संश्लिष्टम् तदर्थं तानि सोऽब्रवीत् ॥
सूक्ष्मानन्तरमेवेशम् शिवां चिन्त्य दशात्मकम् ।
ज्ञानसंकम् विभिद्यान्तु तेषां संख्यां ब्रवीम्यहम् ॥
कामिकं प्रणवाख्यस्य तत्त्ववाक्यस्य च योगजाम् ।
दीप्ताख्यस्यापचिन्त्या यत् कारणाख्यस्य कारणम् ॥
अर्ज्जितं च शिवाख्यस्य दीप्तदीपस्य कीर्त्तितम् ।
सूक्ष्मं सूक्ष्मस्य कालस्य सहस्राख्यं मतम् मतम् ॥
सुप्रभम् परमेश्य अत्तसंज्ञास्य (?) वांस्तया ।
एवम् प्राथमिकः प्रोक्तः पुनरन्यगुरुक्रमा ॥
प्रणवाख्यं तृकलप्राप्तम् कामिकं त्रिकलोद्भवः ।
सुधा स्यात् योगजं तन्त्रम् भस्मसंज्ञं तत्र प्रभुः ॥

DR.RUPNATHJI( DR.RUPAK NATH )

शौमरुद्रावचिन्त्यन्तु गोपतिश्च ततोऽम्बिका ।
कारणात् कारणं सर्व्वं भवप्राप्तात् प्रजापतिः ॥
अर्जितं सुशिवात् प्राप्य उमेश अच्युतः स्मृतः ।
ईशाः शौमः त्रिमूर्त्तिस्तु × × समाहुताशनः ॥
सूक्ष्मसूक्ष्मोद्भवः प्राप्तः तस्मात् प्राप्तः प्रभञ्जनः ।
कालसंज्ञासहस्राख्यं सौम्योधर्म्मः ततः पुनः ॥
दशेषां सुप्रभम् तत्र विग्रहोशस्ततः शशी ।
अंशुमाचाम्बुसंज्ञन्तु प्राप्तोऽग्रततो रविः ॥
एवमेतत् समाख्याता शिवभेदादशादृशे ।
दशाष्टसंख्ययाप्यन्यो रुद्रभेदः परोमतः ॥
दशाष्टसंख्ययारुद्रान् पूर्व्वमुत्पाद्य बुद्धिमान् ।
शिवः तत्संख्यया चैव पुनः तानि मतानि तु ॥
रुद्रस्यानादिसंज्ञस्य वीजं यत् तेन भाषितम् ।
पारमेशम् महामन्त्रम् श्रीकण्ठेण प्रभाषितम् ॥
निश्वासं यत् दाशार्णस्य प्रोद्गीतं नाम शूलिना ।
मुखविम्बम् प्रशान्तस्य विन्दुसिद्धिमतम् मतम् ॥
शिवनिष्ठस्य मतानि सिंहसौम्यस्य चोदितान् ।
चन्द्रकाशमनन्तस्य भद्रं सर्व्वात्मनो मतः ॥
निधनस्य स्वयम्भूस्तान् विवमं तेजसःस्मृतम् ॥
रौरवम् ब्रह्मणो यस्य शिवाख्यस्य च माकुंट ॥
इदं देव-पितृख्यातम् ललितं चलयस्य तु ।
आग्नेयान् यच्च तद्व्योम्न शिवस्यापि पुनः परः ॥
एते जाता महाज्ञानैः शिवदेहात् पुनः शृणु ।
प्राप्ता स्थानादिसंज्ञा तु विजयं परमेश्वरः ॥
श्रीरूपात् परमेशस्तु सम्प्राप्तोऽप्ययणा मुनिः ।
दशस्तराश्च निश्वासं संप्राप्तशैवसम्भवा ॥
प्रोद्गीतं रुद्रसंज्ञस्य क चास्योमुनिसत्तमः ।
प्रशान्तात्मुखविम्बन्तु दधीचिर्नाम यो मुनिः ॥
विन्दुसंज्ञा च यत् सिद्धम् प्राप्तं चण्डोऽसुरगणः ।
शिवनिष्ठाच सन्तानं संप्राप्तः सांशपापरः ॥
नारसिंहम् ततः सौम्या(त्) नृसिंहं प्राप्तवान् महत् ।
अनन्ता(त्) चन्द्रहासन्तु प्राप्य देवः प्ररोहितः ॥
रुद्रसर्व्वात्मदेवात्तु वीरभद्रगणो महान् ।

DR.RUPNATHJI( DR.RUPAK NATH )

स्वायम्भुवं तु निधनम् सः प्राप्तो पद्मसम्भवः ॥
विरसम् तैजसः प्राप्तः प्रजापालखगेश्वरः ।
रौरवम् ब्राह्मणेशानं ( नात् ) संप्रापोनन्दीकेश्वरः ॥
ईशानात् मुकुटां प्राप्तो महादेवो शिलाश्रयम् ।
किरणं दैव पितृतः प्राप्तः सर्वेत्तुको मुनिः ॥
आलयात् ललितं प्राप्तो रुद्रो भैरवरूपधृक् ।
आग्नेयाख्यमसङ्गात्तु संप्राप्तो हुतभक्षणः ॥
शिवाख्या स महाकालात् सारभेदम् पराभयम् ।
रुद्रभेदा मया ख्यातम् विविधः त्रिप्रलक्षणाः ॥
रुद्रभेद शिवभेद भेदाणोयस्तदुद्भवः ।
अतिसंक्षिप्तः विस्तीर्णो ऋषिदेवगणात्मकः ॥
कस्मात् ख्यातोऽत्र भेदश्च भेदोऽयं चित्तभेदन ।
सर्वमेतत् प्रवृत्यर्थं श्रोतृणां विभेदतः ॥
अर्थभेदात् विभेदोयः तूपचारात् प्रकल्पते ।
फलभेदामकल्पात्र कल्पस्येदं पर्यायणम् ॥

इति किरणाख्य तन्त्रे दशमः पटलः ।

गरुड़ उवाच,—

ज्ञानमेकं कथम् भिन्नन्तु न ज्ञातं तत् स्फुटं मया ।
एतत् ब्रूहि महादेव ज्ञानमूलम् यतोऽखिलम् ॥

भगवान् उवाच,—

